प्रीणीताश्वान्सुहितं जयथ जयनं वो हितमस्तु स्वस्तिवाहनं रथं कुरुध्वम्। द्रोणाहावं द्रोणं द्रुममयं भवति। आहाव आह्वानात्। आवह आवहनात्। अवतोऽवातितो महान्भवति। अश्मचक्रम् अशनचक्रम् असनचक्रमिति वा। अंसत्रकोशमंसत्राणि वः कोशस्थानीयानि सन्तु। कोशः कुष्णातेर्विकुषितो भवति। अयमपीतरः कोश एतस्मादेव सञ्चय आचितमात्रो महान्भवति। सिञ्चत नृपाणं नरपाणं कूपकर्मणा संग्राममुपमिमीते।

**काकुदं तात्वित्याचक्षते जिह्वा कोकुवा सास्मिन्धीयते जिह्वा कोकुवा कोकूयमाना वर्णान्वदतीति वा कोकूयतेर्वा स्याच्छब्दकर्मणः । जिह्वा जोहुवा । तालु तरतेस्तीर्णतममङ्गं लततेर्वा स्याल्लम्बकर्मणो विपरीताद्यथा तलं, लतेत्यविपर्ययः ॥ २६ ॥**

घोड़ों को तृप्त करो, भलाई जीतो, कल्याण उठाने वाला रथ बनाओ, इस ( संग्राम रूपी ) कुंएं को भरदो, जिसके चाहवचे लकड़ी के (=रथ ) हैं, व्यापक ( वा फैंके जाने वाले शस्त्र ) जिसके चक्र हैं, धनुष ( वा कवच ) जिसके कोश ( डोल ) हैं, और वीर पुरुष जिसका पानी हैं (१०।१०१।७) तृप्त करो घोड़ों को, बड़ी भलाई जीतो, जीतना तुम्हारी भलाई हो। कल्याण उठाने वाले रथ को बनाओ। द्रोणाहावं=द्रोण=लकड़ी का बना होता है । आहाव=बुलाने से, आवह=भार्ग कराने से । अवत=बहुत नीचे गया होता है। अश्मचक्र=व्यापक चक्र वाला, वा फैंकने वाले चक्र वाला। अंसत्र कोश, अंसत्र (धनुष वा कवच) तुम्हारे कोशों (डालों) के स्थान हों। कोष. कुष् (क्या०प०)से है फाड़ा हुआ होता है। (बीच में से भरने योग्य होता है) यह दूसरा (धन–) का कोश भी इसी से (कुष् से) है। (सञ्चय–कोश) सञ्चय, इकट्ठे किये परिमाण वाला हुआ ढेर होता है।सिंचो, नृपाणं=वीर जिसका पानी है।इस प्रकार कुंएं के कर्म से संग्राम को उपमा देता है। (७६–) काकुद=तालु को कहते हैं। कोकुवा, जिह्वा होती है, वह इस में ( तालु में ) रखी जाती है ( कोकुवा+धा=काकुदं, पृषोदरादि )। अथवा जिह्वा जो कोकुवा है, वह शब्द करती हुई ( तालु में ) वर्णों को

प्रेरती है ( कोकुवा+नुद=काकुदं )। अथवा शब्द अर्थ वाले कोकूय से है। जिह्वा=वार २ बुलाने वाली ( जुहु से )। तालु, तृ ( भ्वा० प० ) से ( शरीर में ) ऊंचा अंग होता है। अथवा आश्रय लेने वाले लत ( भ्वा० प० ) से विपरीत हुए से ( लत से लातु होकर विपरीत हो तालु हुआ है )( इसी धातु से) लता बिना उलटने के है ॥ २६ ॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

सुदेवस्त्वं कल्याणदेवः कमनीयदेवो वा भवसि वरुण यस्य ते सप्त सिन्धवः । सिन्धुः स्रवणात् । यस्य ते सप्त स्रोतांसि तानि ते काकुदमनुक्षरन्ति सूर्मिं कल्याणोर्मिं स्रोतःसुषिरमनु यथा ॥ वीरिटं तैटीकिरन्तरिक्षमेवमाह पूर्वं वयतेरुत्तरमिरतेर्वयांसीरन्त्यस्मिन्भांसि वा । तदेतस्यामृच्युदाहरन्त्यपि निगमो भवति

तू शोभन देवता है, हे वरुण ! जिस तुझ के तालु (समुद्र) की ओर सात नदियें बहती हैं, जैसे छेदों वाले झरने की ओर ( ८ । ६८ । १२ ) सुदेवः=भला देवता वा सुहावना देवता है तू हे वरुण ! जिस तुझ के सात सिन्धु । सिन्धु बहने से है। जिस तुझ के सात प्रवाह तालु की ओर बहते हैं। छेदों वाले अच्छे झरने की ओर जैसे-(७७-) वीरिट, अन्तरिक्ष का नाम तैटीकि कहता है, पहला (भाग, वी) वयति से है, अगला (रिट) इरति से है। पक्षी इस में चलते हैं (वि+इर्+इट) अथवा ज्योति इसमें चलते हैं (भास्+इर्+इट) यह इस ऋचा में दिखलाते हैं॥२७

तति=वीरिट )-अथवा उपमा के अर्थ में है। सब के पति दो 'राजाओं की न्याई। वीरिट=गण=सेना समूह में* मनुष्यों के। रात के बीतने पर पहले बुलावे में, वायु जो नियुतों वाला है, और पूषा, कल्याण के लिये'। नियुत्वान्=नियुत इस के घोड़े हैं। नियुतः=रोकने से वा जोड़ने से ( नि+यम् से वा नि+युज् से ) ( ७८- ) अच्छ, अभि के अर्थ में है, 'अर्थात् पाने के लिये, यह शाकपूणि मानता है। ( ७९.- ) परि ( ८०- ) ईम् ( ८१.- ) सीम्, यह व्याख्या किये गये (१।३;१।१.२;१।७)(१८२-) एन (८३)एनां,अस्याअस्य से व्याख्या किया गया(८४-)सृणिः,अंकस होता है। चलने से (हाथी के सिर पर चलाया जाता है) अंकुश, अञ्च्(भ्वा०प०) से (चलाया जाता है,हाथी के सिर पर) अथवा टेढ़ा किया हुआ होता है (आ+कुञ्च् से) अंकस से भी निकट पका हुआ अनाज ( हमारे घर ) आवे ( यजु० १२। ६८ ) यह भी निगम होता है॥२८॥ इति पञ्चमाऽध्यायःचतुर्थःपादःसमाप्तः॥

# अथ षष्ठोऽध्यायः ।

('आशुशुक्षणिः' से लेकर 'ऋबीसं' तक १३२ पदों की व्याख्या-)

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥

त्वमग्ने द्युभिरहोभिस्त्वमाशुशुक्षणिः।आशु इति च

* वीरिट का अर्थ अन्तरिक्ष मानकर 'विश्पती इव' में इव 'अव' के अर्थ में लेकर विश्पती द्विवचन वायु और पूषा का विशेषण पूर्व किया है। और अब वीरिट का अर्थ गण मानकर विश्पती इव यह उपमा दी है, जैसे दो राजे गण के मध्य में आते हैं, वैसे यह दोनों गण के मध्य में आवें॥

शु इति च क्षिप्रनामनी भवतः । क्षणिरुत्तरः क्षणोते-
राशु शुचा क्षणोतीति वा । सनोतीति वा । शुक्
शोचतेः । पञ्चम्यर्थे वा प्रथमा । तथा हि वाक्यसं-
योगः । आ इत्याकार उपसर्गः पुरस्ताच्चिकीर्षितज
उत्तर आशुशोचयिषुरिति । शुचिः शोचतेर्ज्वलति
कर्मणः । अयमपीतरः शुचिरेतस्मादेव । निःषिक्तम-
स्मात्पापकमिति नैरुक्ताः । 'इन्द्र आशाभ्यस्परि स-
र्वाभ्यो अभयं करत्'। आशा दिशो भवन्त्यासदना-
त् आशा उपदिशो भवन्त्यभ्यशनात् । काशिर्मुष्टिः
प्रकाशनात् । मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा ।
'इमे चिदिन्द्र रोदसी अपारे यत्सङ्गृभ्णा मघवन्काशिरित्ते'
इमे चिदिन्द्र रोदसी रोधसी द्यावापृथिव्यौ विरोधनात्।
रोधः कूलं निरुणद्धि स्रोतः । कूलं रुजतेर्विपरीताल्लो-
ष्टोऽविपर्ययेण । अपारे दूरपारे । यत्सङ्गृभ्णासि
मघवन्काशिस्ते महान् । 'अहस्तमिन्द्र सं पिणक्कु-
णारुम्' । अहस्तमिन्द्रं कृत्वा सम्पिण्ढि परिक्कणनं
मेघम् ॥ १ ॥

हे वीरों के वीर पति अग्ने तू प्रतिदिन चमकता हुआ उत्पन्न होता है, तू शीघ्र प्रकाश से (असुरों का) क्षय करता हुआ (वा यजमान को देता हुआ उत्पन्न होता है, (वा प्रदीप्त करने वाले यजमान से उत्पन्न होता है) तू जलों मे (विद्युद्रूप से) तू पत्थरों (की परस्पर रगड़) में, तू वनों मे (वनाग्नि रूप से)

तू ओषधियों से उत्पन्न होता है ( २।१।१ ) तू हे अग्ने ! द्युभिः=दिनों से ( प्रतिदिन वा दर्श पौर्णमासादि दिनों से ) तू 'आशुशुक्षणि', आशु और शु शीघ्र के नाम हैं (निघ०२।१५) क्षणि अन्त में क्षण ( त० उ० ) से है। शीघ्र प्रकाश से (असुरों का) क्षय करता है, वा (यजमानों को) देता है। शुक् शुच् (भ्वा० प०) से है। ( आशु+शुक्+क्षणिः, वा सनिः=आशुशु क्षणिः ) अथवा पञ्चमी के अर्थ में प्रथमा है, क्योंकि वैसा सारे वाक्य का सम्बन्ध है (अद्भ्यः, अश्मनः, वनेभ्यः, ओषधिभ्यः सब पञ्चम्यन्तों मे अग्नि के प्रादुर्भाव का निमित्त कहा है, वैसे ही आशुशुक्षणि भी निमित्त पञ्चमी है। तब आशुशुक्षणि में) आ, यह आ उपसर्ग पूर्व है। अगला शुशुक्षणि ( शुच् का ) सन्नन्त से बना है, ( अर्थ— ) आशुशोचयिषुः=वार २ प्रदीप्त करने वाला (यजमान)। शुचि जलने अर्थ वाले शुच् (भ्वा०प०) से है। यह दूसरा शुचि(शुद्ध) भी इसी से है(चमकता है यह वैयाकरण) और निकाल डाला गया है इस से पाप,यह नैरुक्त कहते हैं(शुचि शुच् से है। वैयाकरण मानते हैं, सिच् से नैरुक्त ) । ( २— ) आशाभ्यः=दिग्भ्य उपदिग्भ्यो वा ) 'इन्द्र सारी दिशाओं ( उपदिशाओं ) मे हमें अभय करे ( २।४१।१२ )। आशाः, दिशाएं होती हैं। आमने सामने स्थिति से ( आ+सद् से ) आशाः, उपदिशाएं ( कोणें ) होती हैं व्यापने से ( अशूङ् व्याप्तौ स्वा० आ० से ) । (३—) काशिः, मुट्ठी होती है, प्रकाशने से ( काश्ट दीप्तौ, भ्वा० आ० से ) मुष्टिः, खोलने से ( मुच्+ति ) वा चुराने से (मुट्ठी मे चुराते हैं मुष+ति), भूलने से (इस में क्या है, ऐसा मालूम नहीं होता है मुह+ति) 'हे इन्द्र! इन दोनों दूर पार वाले द्यौ और पृथिवी को जो तूने पकड़ा हुआ

है, हे धन वाले यह तेरी बड़ी मुट्ठी है, ( ३ । ३० । ५ ) रोदसी=रोधसी, द्यौ और पृथिवी हैं रोकने से ( सब प्राणियों को अपने अन्दर रोके हुए हैं ) । रोधम्, किनारा होता है, प्रवाह को रोकता है, कूल रुज् ( तु० प० ) से है । विपरीत से (=रूक, होकर कूर=कूल, हुआ है ) लोष्ठ ( उसी का ) बिना विपरीत होने के है ( रुज्+त=रोष्ट=लोष्ठ ) । अपारे=दूर पार वाले, जो तू पकड़ता है, हे धन वाले तेरी मुट्ठी बड़ी है । (४–कुणारुं=मेघं) 'हे इन्द्र इस गर्जते हुए ( मेघ ) को बिना हाथ ( पाओं ) का करके पीस डाल ( ३ । ३० । ८ ) हाथ से शून्य करके ( आगे से कुछ न करते हुए को ) हे इन्द्र पीस डाल । गर्जते हुए=मेघ को ॥१॥

अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार। सुगान्पथोअकृणोन्निरजेगाःप्रावन्वाणीःपुरुहूतंधमन्तीः

अलातृणोऽलमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यन्तरिक्षे गो रेतस्या माध्यमिकाया वाचः । पुरा हननाद्भयमानो व्यार । सुगान्पथो अकृणोन्निरजे गाः । सुगमनान्पथोऽकरोन्निर्गमनाय गवाम् । 'प्रान्वाणीः पुरुहूतं धमन्तीः'। आपो वा वहनाद्वाचो वा वदनात् बहुभिराहूतमुदकं भवति धमतिर्गतिकर्मा

(५–अलातृणः=अलमातर्दनः) (जल से भरा हुआ होने के हेतु) पूरा २ छेदने योग्य, गौ (=वाणी) का वाड़ा, मेघ ताड़ने से पहले ही डरता हुआ शिथिल होगया । गौओं ( जलों ) को निकलने के सुगम मार्ग बना दिये, तब ( मेघस्थ ) जल (तालाब आदि के ) जल को प्राप्त होकर उस की रक्षा करते हैं (३।३०।

१०) अलातृणः=पूरा २ छेदने योग्य। वल मेघ, वृणोति से। व्रज=चलता है अन्तरिक्ष में। गोः=इस माध्यमिक वाणी का। ताड़ने से पहले डरकर शिथिल होगया। 'गौओं के निकलने के लिये सुगम मार्ग बना दिये'। रक्षा करते हैं जल(नदी आदि) जल को प्राप्त होते हुए। (वाणीः) जल,बहने से,वा वाणियें, बोलने से। बहुतों से बुलाया हुआ=जल। धमति गति अर्थ वाला है ॥ २ ॥

उद्वृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥

उद्धर रक्षः सहमूलमिन्द्र। मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा। वृश्च मध्यं। प्रतिशृणीह्यग्रम्। अग्रमागतं भवति। आ कितयो देशात्सललूकं संलुब्धं भवति पापकमिति नैरुक्ताः। सररूकं वा स्यात्सर्त्तेरभ्यस्तात्। तपुषिस्तपतेर्हेतिर्हन्तेः। 'त्यं चिदित्था कत्पयं शयानम्'। सुखपयसं सुखमस्यपयः। विस्रुह आपो भवन्ति विस्रवणात्। 'वया इव रुरुहुः सप्त विस्रुहः' इत्यपि निगमो भवति। वीरुध ओषधयो भवन्ति विरोहणात्। 'वीरुधः पारयिष्ण्वः' इत्यपि निगमो भवति। नक्षद्दाभमश्नुवानदाभमभ्यशनेन दभ्नोतीति। 'नक्षद्दाभं ततुरिं पर्वतेष्ठाम्'इत्यपि निगमो भवति।अस्क्रधोयुरक्रध्वायुः। क्रध्विति ह्रस्वनाम विकृत्तं भवति। 'यो अस्क्रधोयुरजरः स्वर्वान्' इत्यपि निगमो भवति। निशृम्भा निश्रथ्यहारिणः ॥ ३ ॥

( ६—तलल्हकं=तलुब्धं, सरूकं वा ) हे इन्द्र राक्षस को जड़ समेत उखाड़, ( इसके ) मध्य को काट और अग्र को नाश कर, किसी स्थान से इस लालची (वा चलने वाले) को काट, ब्रह्मद्वेषी के लिये तपाने वाला वज्र फेंक (३।३०।१७) उखाड़ राक्षस को जड़ समेत हे इन्द्र। मूल, छुड़ाने से ( उखाड़ने से ) चुराने से वा धोखे से ( अज्ञात होने से ) है। मध्य को काट। नाश कर अग्र को। अग्र=प्राप्त होता है (आ+गम् से) किसी स्थान से लेकर। सलल्कं=लालची होता है, पापी यह नैरुक्त ( मानते हैं ) अथवा सरूक ( ही सलल्क ) है। मृ ( भा० प० ) द्वित्व हुए से। तपुषि, तप ( भा० प० ) से। हेति, हन् (अ० प०) से है। ( ७—कत्पयं=कपयं=सुखपयसं ) 'उस, सुखकारी जल वाले, इस प्रकार ( अन्तरिक्ष में ) लेटे हुए ( मेघ को इन्द्र ने मारा—१।३२।६ ) सुखपयसं=सुखकारी है ( खेतियों के लिये ) इस का जल। ( ८—विसुहः=विस्रवाः ) 'शाखाओं की न्याई उगती हैं, सात बहने वाली ( नदियें वा समुद्र ६।८।६ ) (९—) वीरुधः=ओषधियें होती हैं, उगने से (वि+रुह् से) 'ओषधियें पार लगाने वालीं (१०।९७।३) यह भी निगम होता है। (१०—) नक्षद्दाभं=अश्नुवानदाभं=पहुंच कर मारने वाला। 'पहुंचकर मारने वाले, त्वरित गति वाले, मेघ पर स्थित ( इन्द्र ) को ( बज्रवान बनाते हुए—६।२२।२ )।(११—) अस्कृधोयुः=न थोड़ी आयु वाले। कृधु थोड़े का नाम है, कटा हुआ होता है (कृत से)। 'जो (धन) दीर्घ आयु ( देने ) वाला जीर्ण न होने वाला, सुख वाला (है उसको हमारे लिये ला—६।२२।३ ) यह भी निगम होता है। (१२—) निश्रृम्भाः= दृढ़ लेजाने वाले ॥ ३ ॥

'आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः' । आवहन्त्वजाः पूषणं रथे निश्र-थ्यहरिणास्ते जनश्रियं जातश्रियम् । बृबदुक्थो मह-दुक्थो वक्तव्यमस्मा उक्थमिति बृबदुक्थो वा ।'बृब-दुक्थं हवामहे'इत्यापि निगमो भवति। ऋदूदरः सोमो मृदूदरो मृदुरुदरेष्विति वा। 'ऋदूदरेण सख्या सचेय' इत्यपि निगमो भवति । ऋदूपे इत्युपरिष्टाद् व्याख्या-स्यामः। पुलुकामः पुरुकामः'पुलुकामो हि मर्त्य'इत्यपि निगमो भवती । असिन्वति असङ्खदन्त्यौ । 'असि-न्वती बप्सति भूर्यत्त' इत्यपि निगमो भवति ! कपनाः कम्पनाः क्रिमयो भवन्ति।'मोषथा वृक्षं कपनेव वेधसः' इत्यपि निगमो भवति । भाऋजीकः प्रसिद्धभाः । 'धूमकेतुः समिधा भाऋजीकः'इत्यपि निगमो भवति। रुजाना नद्यो भवन्ति रुजन्ति कूलानि ।'सं रुजानाः पिंपिष इन्द्रशत्रुः' इत्यपि निगमो भवति। जूर्णिर्ज-वतेर्वा द्रवतेर्वा दूनोतेर्वा ।'क्षिप्ता जूर्णिर्न वक्षतिइत्यपि निगमो भवति । 'परि ध्रंसमोमना वां वयो गात्' । पर्यगाद्वां ध्रंसमहरवनायान्नम् ॥४॥

वह दृढ़ होकर लेजाने वाले अज (बकरे पूषा के घोड़े) पूषा देव को रथ में धारण किये हुए लावें, जो जन्तुमात्र का आश्रय

है ( ६ । ५५ । ६ ) लावें अज पूषा को रथ में, दृढ़ होकर लाने वाले वह । जनश्रियं=जो उत्पन्न हुए ( मद ) का आश्रय है। (१३—) बृबदुक्थः=बड़े उक्थ ( स्तोत्र ) वाला । अथवा इस के लिये उक्थ कहना चाहिये । 'बड़े उक्थ वाले ( इन्द्र ) को हम बुलाते हैं ( ८ । ३२ । १० ) यह भी निगम होता है । (१४—) ऋदूदरः=सोम, मृदु उदर वाला, अथवा मृदु होता है उदरों में। 'मृदु उदर वाले सखा (सोम ) से मैं संगत होऊं' ( ८।४८।१० ) यह भी निगम होता है । (१५—) ऋदूपे आगे व्याख्या करेंगे। (अर्दन पातिनौ=पीड़कर गिराने वाले । देखो ६।३३) । (१६—) पुलुकामः=बहुत कामनाओं वाला । 'क्योंकि मनुष्य बहुत कामनाओं वाला है' । ( १ । १७९ । ५ ) यह भी निगम होता है । (१७—) असिन्वती=न खाती हुई '(अग्नि की हनु) (मानो) न खाती हुई भी चबाती हैं ( १० । ७९ । १ ) यह भी निगम होता है । (१८—) कपनाः=कंपाने वाले, कृमि होते हैं । 'वींधने वाले कृमि ( घुण आदि ) जैसे वृक्ष को (चुराते हैं=सार खींच लेते हैं, वैसे तुम हे मरुतो ! मेघ को) चुराते हो ( जल खींचकर बरसाते हो (५।५४।६) यह भी निगम होता है । ( १९— ) भा ऋजीकः=ऋजु भाः=सीधी दीप्ति वाला । 'धुएं के झंडे वाला समिधा से सीधी दीप्ति वाला (ऊपर को जलता हुआ अग्नि— १० । १२ । २ ) (२०—) रुजानाः=नदियें होती हैं, किनारों को तोड़ती हैं । 'इन्द्र जिसका नाशक है, वह ( वृत्र ) नदियों को पीस डालता भया (नदियों के किनारे टूट गए—१।३२।६) यह भी निगम होता है । (२१—) जूर्णिः जु गतौ से, द्रु गतौ वा दु उपतापे से है। शक्ति वा सेना '( असुरों से ) फेंकी हुई शक्ति ( वा भेरी हुई सेना ) हमें प्राप्त होगी ( १ । १२९ । ८ ) यह

भी निगम होता है (२२-) ओमना=अवनेन 'प्रतिदिन तुम दोनों की रक्षा के द्वारा अन्न च रों ओर से प्राप्त होता है(७।६९।४) परि+अगात्=चारों ओर से प्राप्त होता है। घ्रंसं=दिन,ओमना= अवनेन=रक्षा से, ( वयस्=) अन्न ॥ ४ ॥

उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वा । (इन्द्र ऋषीन्पप्रच्छ दुर्भिक्षे केनजीवतीति तेषामेकः प्रत्युवाच

शकटं शाकिनी गावो जालमस्यन्दनं वनम् ।
उदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तयः ॥

इति सा निगदव्याख्यता) ॥ ५ ॥

उपलप्रक्षिणी=पत्थरों पर (डालकर) पीसने वाली, वा पत्थर पर (दाने) फेंकने वाली (भूनने वा पीसने के लिये) (इन्द्र ने ऋषियों से पूछा, दुर्भिक्ष में किस से जीविका करता है, उन में से एक ने उत्तर दिया। 'छकड़ा, शाकवाली भूमि,गौएं, जाल, (पानी के) बहाव का रोकना,वन,समुद्र,पर्वत,राजा, यह नौ दुर्भिक्ष में आजीविकाएं हैं' । यह पढ़ने से ही व्याख्या की गई है*)॥५॥

'कारुरहं ततो भिषगुपलप्रक्षिणी नना । नाना-धियो वसूयवोऽनुगा इव तस्थिमेन्द्रायेन्दो परिस्रव'॥ कारुरहमस्मि, कर्ता स्तोमानां, ततो भिषक् । तत इति सन्ताननाम पितुर्वा पुत्रस्य वा । उपलप्रक्षिणी सक्तुकारिका । नना नमतेर्माता वा दुहिता वा ।

* बन्धनी के अन्तर्गत पाठ वृत्तिकार ने भी नहीं लिखा, सायणाचार्य ने भी नहीं लिखा ॥

नानाधियो नानाकर्माणः,वसूयवो वसुकामाः,अन्वास्थिताः स्मो गाव इव लोकम् । इन्द्रायेन्दो परिस्रव, इत्यध्येषणा ।'आसीन ऊर्ध्वामुपसिक्षिणाति' ।उपस्थे। प्रकलविद्वणिग्भवति कलाश्च वेदप्रकलाश्च ।'दुर्मित्रासः प्रकलविन्मिमानाः' इत्यपि निगमो भवति । अभ्यर्धयज्वाभ्यर्धयन्यजाति । 'सिषक्ति पूषा अभ्यर्धयज्वा' इत्यपि निगमो भवति । ईक्ष ईशिषे । 'ईक्षे हि वस्व उभयस्य राजन्'इत्यपि निगमो भवति।क्षोणस्य क्षयणस्य 'महःक्षोणस्याश्विना कण्वाय'इत्यपि निगमो भवति।६।

मैं स्तोता हूं, मेरा पिता (वा पुत्र) चिकित्सा करता है,माता (वा कन्या) सत्तु बनाने वाली है । भिन्न २ कर्मों वाले,धन चाहते हुए हम (इस लोक में) गौओं की न्याईं ( अनेक उपकारों से ) स्थित हैं* । इन्द्र के लिये हे सोम ! तू बह (९।१।१२।३) में, कारु= बनाने वाला स्तोमों का हूं । तात चिकित्सा करने वाला है । तत सन्तान का नाम है । पिता का है वा पुत्र का है । उपल प्रक्षिणी =सत्तु बनाने वाली । नना, नम् (भ्वा० प०) से है । माता वा कन्या । नानाधियः=भिन्न २ कर्मों वाले । वसूयवः=धन की कामना वाले । स्थित हैं लोक में गौओं की न्याईं । इन्द्र के लिये

---

* यहां चिकित्सा करने वाले से ब्रह्मा (जो यज्ञ का चिकित्सक होता है । यज्ञ की त्रुटि को पूरा करता है) अभिप्रेत है, और सक्तु कारिका से यज्ञ के लिये सत्तु बनाने वाली अभिप्रेत है । अर्थात् हम सारा परिवार यज्ञ में लगे हैं । तत से पिता अभिप्रेत मानें, तो नना से माता अभिप्रेत है । तत से पुत्र लें,तो नना से कन्या लेनी चाहिये

हे इन्द्रो ! वह' यह प्रार्थना है। (२४–) उपसि=उपस्थे 'निकट उपरली ( भूमि ) में बैठा हुआ वह (इन्द्र) ( शत्रुओं को ) मारता है ( १० । २७ । १३ )। ( उपसि= ) उपस्थ में=निकट। (२५–) प्रकलविद् वाणिया होता है (व्यवहार की) कला प्रकला (सूक्ष्माति सूक्ष्म भेद) जानता है। 'खोटे मित्र वाणियें (की न्याई) मिनते हुए (थोड़ा जल देते हुए, मेघ, इन्द्र से ताड़े हुए बहुत जल छोड़ते भए'–७ । १८ । १५)। (२६–) अभ्यर्द्धयज्वा=अभ्यर्धयन् यजति=बढ़ाकर मान करने वाला 'सेवन करता है पूषा ( अपने स्तोताओं को धन आदि से ) बढ़ाकर मान करने वाला। (६ । ५० । ५ ) यह भी निगम होता है। (२७–) ईक्षे=ईशिषे 'क्योंकि तू हे राजन् ! ( इन्द्र ) दोनों प्रकार के ( पार्थिव और दिव्य ) धन पर ईशन करता है ( ६ । १९ । १० ) । (२८–) क्षोणस्य=क्षयणस्य 'कण्व को हे अश्वियो ! तुम ने बड़ा निवास ( घर, दिया'–१ । ११७ । ८ ) ॥ ६ ॥

'अस्मे ते बन्धुः' वयमित्यर्थः। 'अस्मे यातं नासत्या सजोषाः'। अस्मानित्यर्थः। 'अस्मे समानेभिर्वृषभ पौंस्येभिः'। अस्माभिरित्यर्थः। 'अस्मे प्र यन्धि मघवन्नृजीषिन्'। अस्मभ्यमित्यर्थः। 'अस्मे आराचिद्द्वेषः सनुतर्युयोतु'। अस्मादित्यर्थः। 'ऊर्व इव पप्रथे कामो अस्मे'। अस्माकमित्यर्थः। 'अस्मे धत्त वसवो वसूनि'। अस्मास्वित्यर्थः। पाथोऽन्तरिक्षं पथा व्याख्यातम्। 'श्येनो न दीयन्नन्वेति पाथः' इत्यपि निगमो भवति। उदकमपि पाथ उच्यते पानात्। आ

चष्ट आसां पाथो नदीनाम्'इत्यपि निगमो भवति। अन्नमपि पाथ उच्यते पानादेव। 'देवानां पाथ उप वक्षि विद्वान्'इत्यपि निगमो भवति। सवीमनि प्रसवे। 'देवस्य वयं सवितुः सवीमनि'इत्यपि निगमो भवति। सप्रथाः सर्वतः पृथुः। 'त्वमग्ने सप्रथा असि'इत्यपि निगमो भवति। विदथानि वेदनानि। 'विदथानि प्रचोदयन्' इत्यपि निगमो भवति॥ ७॥

(२९.—'अस्मे' यह पद अस्मद् शब्द का बहुवचन सर्व विभक्तियों में है जैसे) 'हम तेरे बन्धु हैं' (यजु० ४। २२) (यहां अस्मे का) हम, यह अर्थ है। 'हमारी ओर आओ हे समान प्रीति वाले अश्वियो' (१।११८।११) हम को=हमारी ओर, यह अर्थ है। 'हे वज्रवन् (इन्द्र) हम (मरुत) जो तेरे बराबर के (साथी) हैं, उनके साथ मिलकर अपने पुरुषार्थों से (तूने बड़ा काम किया—१।१६५।७) हमारे साथ, यह अर्थ है। 'हमारे लिये दे हे धन वाले हे ऋजीष वाले'। (३।३६।१०) हमारे लिये, यह अर्थ है। 'हम से दूर स्थित भी द्वेषियों को बेमालूम दूर कर' (६।४७।१३) हम से, यह अर्थ है। 'अग्नि की तरह फैलती जाती है हमारी कामना' (३।३०।१९) 'हमारी' यह अर्थ है। 'हम में रखो हे वसुओ! धन (यजु० ८।१८) 'हम में' यह अर्थ है। (३०—पाथम्=अन्तरिक्षं, उदकं, अन्नं वा) पाथस् अन्तरिक्ष है पथिन् से व्याख्या किया गया है '(पततेर्वा पद्यतेर्वा पन्थतेर्वा २।२८)'। 'उड़ते हुए बाज़ की तरह अन्तरिक्ष में आता है (सूर्य, ७।६३।५)। यह भी निगम होता है। जल

भी पाथस् कहलाता है पीने से ( पा, भ्वा० प० से ) 'देखता है, इन नदियों के जल को ( वरुण—७ । ३४ । १० ) यह भी निगम होता है । अन्न भी पाथस् कहलाता है पीने से ही। 'जानता हुआ तू देवताओं के अन्न को (उनके) पास लेजा (१०।७०।१०) यह भी निगम होता है । (३१–) सवीमनि=प्रेरणा में ' सविता की प्रेरणा में हम (उत्तम दान के देने में लगें—६।७१।२) यह भी निगम होता है । (३२–) सप्रथाः=सब ओर फैला हुआ । ' हे अग्ने तू सब ओर फैला हुआ है (५ । १३ । ४) यह भी निगम होता है । (३३–) विदथानि=ज्ञान 'ज्ञानों को भरता हुआ (अग्नि आता है—३ । २७ । ७) यह भी निगम होता है ॥ ७ ॥

**आयन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।**
**वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम॥**

समाश्रिताः सूर्यमुपतिष्ठन्ते । अपि वोपमार्थे स्यात्सूर्यमिवेन्द्रमुपतिष्ठन्त इति।सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः। स यथा धनानि विभजति जाते च जनिष्यमाणे च तं वयं भागमनुध्यायामौजसा बलेन। ओज ओजतेर्वोब्जतेर्वा।आशीराश्रयणाद्वा श्रपणाद्वा अथेयमितराशीराशास्तेः । 'इन्द्राय गाव आशिरम्'इत्यपि निगमो भवति ।'सा मे सत्याशीर्देवेषु'इति च । 'यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः' । यदा ते मर्तो भोगमन्वापदथ ग्रसितृतम ओषधीरगारीः। जिगर्तिर्गिरतिकर्मा वा गृणातिकर्मा

वा गृह्णातिकर्मा वा । 'मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से' । मूढा वयं स्मोऽमूढस्त्व-मसि न वयं विद्मो महत्वमग्ने त्वं तु वेत्थ । शशमानः शंसमानः । 'यो वां यज्ञैःशशमानो ह दाशति'इत्यपि निगमो भवति ।'देवो देवाच्या कृपा'।देवो देवान्प्रत्य-क्तया कृपा । कृप् कृपतेर्वा कल्पतेर्वा ॥ ८ ॥

(सूर्य का) आश्रय लिये हुए (किरण) इन्द्र (सूर्य) के सारे धनों (जलों) को ( बांटना चाहते हुए ) सूर्य के पास आते हैं, (अथवा सूर्य की न्याईं इन्द्र के पास आते हैं, इन्द्र के धनों को बांटना चाहते हुए) वह (सूर्य वा इन्द्र) जैसे हरएक उत्पन्न हो चुके और उत्पन्न होने वाले में धनों को बल से ( ऐश्वर्य से) बांटता है, (उस भाग को सब भोगते हैं) हम उस भाग का ( अपने लिये) ध्यान करते हैं (८ । ८८ । ३) आश्रय लिये हुए सूर्य के पास आते हैं (इस अर्थ में यहां 'इव' अनर्थक है) अथवा उपमा के अर्थ में होसकता है 'सूर्य की न्याईं इन्द्र के पास आते हैं' । 'सारे इन्द्र के धनों को बांटना चाहते हुए' । 'वह जैसे धनों को बांटता है उत्पन्न हुए में और उत्पन्न होने वाले में' उस भाग का ध्यान करें (यहां 'न' अनर्थक है, अथवा अनु के अर्थ में है ' अनु ध्यायाम' ) ओजसा=बल से । ओजस् ओज (चु० उ०) से । वा उब्ज ( तु० प० ) से । (३५–) आशीः=मिलाने से ( सोम से मिलाया जाता है) वा किञ्चिद् पकने से (दूध) और यह जो दूसरा आशीः (आशीर्वाद के अर्थ में) है, आ+शास् ( अ० प० ) से है । 'इन्द्र के लिये गौएं ( सोम में मिलाने का ) दूध दुहाती हैं' ।

(८ । ५८ ।-६) यह भी निगम होता है । (दूसरे का उदाहरण-) 'वह मेरी सच्ची आशा देवताओं में ( पहुंचे ) यह भी । (३६-अजीगः=अगारीः) 'जब मनुष्य तेरे भोग को प्राप्त होता है' (सवारी करके आनन्द उठाता है)तब तू हे बहुत खाने वाले (अश्व) ओषधियों को निगलता है(पहले मनुष्य का उपकार करके तब उस से दिये घास को तू खाता है) (१।१६३।७) जब मनुष्य तेरे भोग को प्राप्त होता है, तब हे बहुत खाने वाले तू ओषधियों को निगलता है, जिगर्ति ( गृ, जुहो० ) खाने अर्थ वाला वा शब्द करने अर्थ वाला वा ग्रहण करने अर्थ वाला है । (३७-अमूरः=अमूढः) 'हे न भूलने वाले । हे जानने वाले हम भूलने वाले हैं, हे अग्ने तू ही अपनी महिमा को जानता है ( १० । ४ । ४ ) हम भूलने वाले हैं, तुझ में कोई भूल नहीं है, हम नहीं जानते हैं । ( तेरी ) महिमा, हे अग्ने तू जानता है । (३८-) शशमानः=स्तुति करता हुआ । 'जो तुम दोनों को ( हे मित्र वरुण) स्तुति करता हुआ यज्ञों से देता है (१ । १५१ । ७) यह भी निगम होता है। (३९-) देवो देवाच्या कृपा=देवाच्या=देवों के प्रति प्राप्त हुई । 'हे देव (अग्नि) देवताओं को पहुंचने वाले सामर्थ्य से (हवि लेकर देवताओं के पास पहुंचने वाले सामर्थ्य से युक्त हुआ-१।१२७।१) देव देवताओं को पहुंची हुई सामर्थ्य से, कृप्, कृप् (भ्वा० आ०) से है वा कल्प(भ्वा० आ) से है (एवं च कृप्,कल्पेति धातुद्वयं यास्कमते) ॥ ८ ॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्
अथासोमस्यप्रयतीयुवभ्यामिन्द्राग्नीस्तोमंजनयामिनव्यम्

अश्रौषं हि बहुदातृतरौ वां विजामातुरसुसमाप्ता-ज्जामातुः। विजामातेति शश्वद् दाक्षिणाजाः क्रीता-पतिमाचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतः। जामाता जा अपत्यं तन्निर्माता। उत वा घा स्यालादपि च स्यालात्। स्याल आसन्नः संयोगेनेति नैदानाः। स्याल्लाजानावपतीति वा। लाजा लाजतेः स्यं शूर्पं स्यतेः। शूर्पमशनपवनं शृणातेर्वा। अथ सोमस्य प्रदानेन युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यं नवतरम्। ओमास इत्युपरिष्टाद् व्याख्यास्यामः॥९॥

हे इन्द्राग्नी! तुम दोनों को मैंने विजामाता से भी और साले से भी बहुत बढ़कर देने वाला सुना है, अब मैं तुम दोनों के लिये सोम देने के साथ नया स्तोत्र बनाता हूं (१।१०९।२) सुना है मैंने तुम दोनों को बहुत बढ़कर देने वाले, विजामाता से, न ठीक पूर्ण हुआ जामाता=विजामाता,यह दाक्षिणात्य खरीदी हुई कन्या के पति को कहते हैं (अर्थात् जो गुण हीन होने से कन्या पाने के योग्य न होकर रुपया खर्च के किसी से कन्या लेता है, ऐसा जामाता विजामाता है) ऐसा वर अभिमेत है जो मानों ठीक पूरा नहीं हुआ (गुण हीन होने से)। जामाता=जा सन्तान, उसका बनाने वाला। 'उतवाघा स्यालात्' साले से भी। स्यालः=सम्बन्ध से निकट होता है यह निदान के जानने वाले कहते हैं। अथवा (बहिन के विवाह में) छजली से लाजा देता है (लाजा होम के लिये)। स्यं, छाज का नाम है, पो ( अन्त

कर्मणि, दि० प० ) से । शूर्प=अनाज का शोधने वाला । अथवा शॄ (क्र्या० प०) से है। अब सोम के देने के साथ तुम दोनों के लिये हे इन्द्राग्नी स्तोत्र बनाता हूं,तथा (४१.—) ओमासः आगे ( १२ । ४० में) व्याख्या करेंगे, ( अवितारः=रक्षक, वा अवनीयाः=रक्षणीय ) ॥ ९ ॥ इति द्वितीयः पादः ॥

'सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः' । सोमानं सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः । कक्षीवान्कक्ष्यावानौशिज उशिजः पुत्रः । उशिग्वष्टेःकान्तिकर्मणः । अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्तं सोमानां सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते॥१०

(४२—सोमानं=सोतारं) हे ब्रह्मणस्पते ( वेद के पति ) सोम बहाने वाले को प्रकाश वाला बना कक्षीवान् की तरह जो उशिज् का पुत्र था ( १ । ५८ । १ ) सोम रसों के बहाने वाले को प्रकाश वाला बना हे ब्रह्मणस्पते ! कक्षीवान् की न्याईं, जो उशिज का पुत्र था । कक्षीवान् कक्ष्याओं ( डेउढ़ियों ) वाला । औशिजः=उशिज् का पुत्र । उशिज् कामना अर्थ वाले वश ( अ० प० ) से है । अथवा यह (कक्ष्या) मनुष्य की छाती ही अभिप्रेत हो'सोम के बहाने वाले उस मुझको प्रकाश वाला बना हे ब्रह्मणस्पते (जो मैं छाती वाला=शूरवीर, उशिज्पुत्र हूं) ॥१०॥

'इन्द्रासोमा समघशंसमभ्यघं तपुर्ययस्तुचरुरग्निवाँ इव । ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो

धंत्तमनवायं किमीदिने "॥ इन्द्रासोमावघस्य शंसितारम् । अघं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति । तपुस्तपतेः । चरुर्मृच्चयो भवति चरतेर्वा समुच्चरन्त्यस्मादापः । ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे क्रव्यमदते घोरचक्षसे घोरख्यानाय । क्रव्यं विकृत्ताज्जायत इति नैरुक्ताः । द्वेषो धत्तमनवायमनवयवं यदन्ये न व्यवेयुरद्वेषस इति वा । किमीदिने किमिदानीमिति चरते किमिदं किमिदमिति वा पिशुनाय चरते । पिशुनः पिंशतेर्विपिंशतीति ॥ ११ ॥

(४३–अनवायं=अनवयवं, ४४–किमीदिने=किमिदंकारिणे = पिशुनाय) हे इन्द्रसोम पाप की ओर झुके हुए पाप कहने वाले को संतप्त करो, वह तप्त हुआ, अग्नि-युक्त चरु की न्याईं नष्ट हो, ब्राह्मणों के द्वेषी, कच्चा मांस खाने वाले, भयंकर दृष्टि वाले, क्या यह है (धर्मकार्यों में) ऐसा वर्तते हुए (दुर्जन) के लिये पूरा २ द्वेष धारो (७।१०४।२) हे इन्द्रसोम, पाप के कहने वाले को । अघ, (पूर्वला)आ, उपसर्ग ह्रस्व होकर हन् (अ० प०) से है, (= चोट देता है)।तपु,तप(सन्तापे,भ्वा०प०) से है।चरु,मट्टी का ढेर होता है(चिञ् चयने,स्वा०उ०से)अथवा चर(भ्वा०प०) से;निकलते हैं इससे जल (मेघ का नाम भी है २।२१) । ब्रह्मद्विषे=ब्राह्मणों से द्वेष करने वाले के लिये । कच्चा मांस खाने वाले भयंकर दृष्टि वाले के लिये । क्रव्य=काटने से उत्पन्न होता है (कृती छेदने,तु० प०से) यह नैरुक्त कहते हैं । द्वेष धारो । अनवायं=पूरा २

(अनवयव से अनवाय हुआ है) अथवा जिसको दूसरे अद्वेषी भी हटा न सकें (न हटने वाला द्वेष धारी—न+अवयु, से) किमी दिने =क्या है अब, ऐसा ढूंढते हुए विचरने वाले के लिये। अथवा यह क्या? यह क्या? (ऐसा आक्षेप ही करने वाले के लिये= दुर्जन के लिये जो फिरता रहता है)। पिशुन पिंश (तु० उ०) से है, विविध रूप बनाता है ॥ ११ ॥

"कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः"॥ कुरुष्व पाजः। पाजःपालनात्प्रसितिमिव पृथ्वीम्। प्रसितिः प्रसयनात्तन्तुर्वा जालं वा। याहि राजेवामात्यवानभ्यमनवान्स्ववान्वेराभृता गणेन गतभयेन हस्तिनेति वा। तृष्व्यानु प्रसित्या द्रूणानः। तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वा। आसितासि विध्य रक्षसस्तपिष्ठैस्तप्ततमैस्तृप्ततमैःप्रपिष्ठतमैरिति वा॥'यस्ते गर्भममीवा दुर्णामा योनिमाशये'। अमीवाभ्यमनेन व्याख्यातः। दुर्णामा क्रिमिर्भवति पापनामा। क्रिमिः क्रव्ये मेद्यति, क्रमतेर्वा स्यात्सरणकर्मणःक्रामतेर्वा॥ 'अतिक्रामन्तो दुरितानि विश्वा'। अतिक्रममाणा दुर्गतिगमनानि सर्वाणि। अप्वा यदेनया विद्धोऽपवीयते व्याधिर्वा भयं वा।'अप्वे परेहि'इत्यपि निगमो भवति। अमतिरमामयी मतिरात्ममयी। 'ऊर्ध्वा

यस्यामतिर्भा अदिद्युतत्सत्वीमनि' इत्यपि निगमो भवति । श्रुष्टीति क्षिप्रनामाशु अष्टीति ॥ १२ ॥

(४५–अमवान्=अमात्यवान्, अभ्यमनवान्, आत्मवान् वा) (हे अग्ने) फैले हुए फंदे की न्याईं अपना बल बना (फैला) और हाथी से (वा सेना से) युक्त मन्त्रियों वाले राजा की न्याईं तेज़ हमले से मारता हुआ तू (राक्षसों पर) चढ़ाई कर, तू फेंकने वाला है, तपती २(चिंगाड़ियां) से राक्षसों को वींध दे (४।४।१) फैला बल । पाजस्, पालन से (बल से पालन होता है) प्रसितिः, बांधने से, (षिञ्‌बन्धने से) फंदा वा जाल । 'जा राजा की न्याईं (अमवान्–) मन्त्रियों वाले, वा रोग वाले (जो शत्रुओं के लिये रोग रूप है) अथवा अपनों वाले (जिस के साथ अपने जन हैं) (इभेन–)अन्न के धारने वाले गण(=सेना) के साथ(इरा। भृ से) अथवा दूर हुए भय वाले हाथी के साथ (इत+भय से) 'तेज़ हमले से मारता हुआ' । तृष्वी शीघ्र का नाम है । तृ (भ्वा०प०) से, वा त्वर (भ्वा०आ०) से । तू फेंकने वाला है, वींध राक्षसों को,तपिष्ठैः=बहुत तपतीहुईयों से वा बहुत पिसीहुइयों (सूक्ष्म चिंगाड़ियों) से (४६–अमीवा=अभ्यमनं=रोगः) 'जो दुर्णामा (कीट–) रोग तेरी योनि में गर्भ में लेटता है (अर्थात् जो गर्भ का बाधक है, उसको अग्नि नष्ट करे–१०।१६२।। २) अमीवा, (पूर्व अम की व्याख्या६।१२ में कहे) अभ्यमन से व्याख्यात है। दुर्णामा, क्रिमि होता है, पापनामा । क्रिमि=कच्चे मांस में पुष्ट होता है (क्रव्य+मिद) अथवा गति अर्थ वाले क्रम(भ्वा०प०) से है । (४७–दुरितं=दुर्गतिगमनं) 'उलांघते हुए सब दुर्गतियों को, (४८–) अग्ने, जिस लिये इस से वींधा हुआ (पुरुष) अलग

होता है (सुख से,वा प्राणों से)। रोग वा भय। 'हे भय तू (शत्रुओं में) चलाजा' (१०।१०३।१२) (४९—) अमतिः=अमामयी मतिः= अपना स्वरूप भूत प्रकाश 'ऊंचा जिसका प्रकाश, जो उसका अपना रूप है, चमकता है (साम० छ० आ० ५।२।३।८) (५०—) श्रुष्टी, शीघ्र का नाम है, (शु+अष्टिः) जल्दी व्यापना ॥ १२ ॥

'ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम्"। तानध्वरे यज्ञे उशतः कामयमानान्, यजाग्ने श्रुष्टी भगं नासत्यौ चाश्विनौ। सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य प्रणेताराविल्याग्रायणः। नासिकाप्रभवौ बभूवतुरिति वा। पुरन्धिर्बहुधीस्तत्कः पुरन्धिर्भगः पुरस्तात्तस्यान्वादेश इत्येकम्। इन्द्र इत्यपरं स बहुकर्मतमः पुरां च दारयितृतमः। वरुण इत्यपरं। तं प्रज्ञया स्तौति। 'इमामू नु कवितमस्य मायाम्'इत्यपि निगमो भवति। रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः। 'समिद्धस्य रुशददर्शि पाजः' इत्यपि निगमो भवति ॥१३॥

(५१—पुरन्धिः=पुरुधीः=बहुकर्मा बहुप्रज्ञो वा) कामना करते हुए उन देवताओं भग, अश्वि और पुरन्धि को हे अग्ने यज्ञ में जल्दी पूज(७।३९।४) उनको यज्ञ में, उशतः=कामना करते हुओं को पूज हे अग्ने जल्दी। भग को, और 'नासत्यौ=अश्वियों को। सच्चे ही नासत्य हैं(अर्थात् उनमें असत्य सर्वथा नहीं है) यह और्णवाभ कहता है। सत्य के चलाने वाले(सत्य+नी, भ्वा० उ०

से,ना पूर्व में होकर) यह आग्रायण कहता है। अथवा नासिकाओं से प्रकट हुए थे। पुरन्धि=बहुत कर्म वाला या बहुत प्रज्ञा वाला। (प्रश्न) कौन है पुरन्धि(उत्तर)भग पूर्व(कहा है)उसका यह पुनर्वचन है (गुण-नाम से), यह एक मत है, इन्द्र (पुरन्धि) है यह दूसरा मत है, क्योंकि वह बहुत कर्मों वाला। अथवा (मेघों के) किलों का सबसे बढ़ कर फाड़ने वाला है। वरुण(यहां पुरन्धि) है, यह और मत है (क्योंकि) उसको 'बुद्धि से' स्तुति करता है (स्तोता) (जैसा कि) 'बड़ी प्रज्ञा वाले (वरुण) की इस प्रज्ञा को (नकिरा दधर्ष=कोई नहीं दबा सकता है—५।८५।६) यह भी निगम होता है (इस लिये बड़ी प्रज्ञा वाला वरुण ही यहां पुरन्धि शब्द से अभिप्रेत, यह अभिप्राय है) (५२—) रुशत्=रंग का नाम, चमकने अर्थ वाले रुच् (भ्वा० आ०) से। 'प्रदीप्त हुए (अग्नि) का चमकता हुआ वर्ण और बल देखा गया है (५।१।२) यह भी निगम होता है॥ १३॥

'अस्ति हि वःसजात्यं रिशादसो देवासो अस्त्याप्यम्'। अस्ति हि वः समानजातिता रेशयदारिणो देवा अस्त्याप्यम्। आप्यमाप्नोतेः। सुदत्रः कल्याणदानः।'त्वष्टा सुदत्रो वि दधातु रायः'इत्यपि निगमो भवति। सुविदत्रः कल्याणविद्यः।'आग्ने याहि सुविदत्रेभिरर्वाङ्'इत्यपि निगमो भवति। आनुषगिति नामानुपूर्वस्यानुषक्तं भवति। 'स्तृणन्ति बर्हिरानुषक्'इत्यपि निगमो भवति। तुर्वणिस्तूर्णवनिः। 'स

तुर्वणिर्महाँ अरेणु पौंस्ये' इत्यपि निगमो भवति । गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति । 'जुष्टं गिर्वणसे बृहत्'इत्यपि निगमो भवति ॥ १४ ॥

(५३–रिशादसः=रेशयदारिणः) 'हे हिंस्रों के फैंकने वाले देवताओ ! है तुम्हारी आपस में सजातिता और है (हमारे साथ तुम्हारा) बन्धुभाव (८।२७।१०) है तुम्हारी समान जातिता हे हिंस्रों के फैंकने वाले देवताओ ! और है बन्धुभाव। आप्यं, आप्लृव्याप्तौ से है । (५४–) सुदत्रः=अच्छे दान वाला 'अच्छे दान वाला त्वष्टा धन देवे' (७।३४।२२) यह भी निगम होता है। (५५–) सुविदत्रः=अच्छी विद्या वाला 'अच्छी विद्या वालों (पितरों) के साथ हे अग्ने हमारी ओर आ (१०।१५।९) यह भी निगम होता है । (५६–) आनुषक्, यह लगातार का नाम है, साथ लगा होता है (अनु+सज्, भ्वा० प० से)'कुशा को लगातार बिछाते हैं'(८।४५।१)यह भी निगम होता है(५७–)तुर्वणिः=जल्दी सेवन करने वाला (जल्दी करने वाला) 'वह शीघ्र कारी महान् है (उसका) धूलरहित (बल) संग्राम में (चमकता है–१।५६।३) यह भी निगम होता है। (५८–) गिर्वणस्, देवता होता है, स्तुतियों से इस को सेवन करते हैं। 'स्तुतियों से सेवने योग्य (इन्द्र) के लिये प्यारा बृहत ( सामगाओ–८।७८।७ ) यह भी निगम होता है ॥ १४ ॥

'असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि' । असुसमीरिता सुसमीरिते वातसमीरिता माध्यमिका देवगणा ये रसेन पृथिवीं तर्पयन्तो

भूतानि च कुर्वन्ति, त आयजन्तेत्यतिक्रान्तं प्रतिवचनम् ॥ 'अभ्यक्ता त इन्द्र ऋष्टिः' । अमाक्तेति वाभ्यक्तेति वा 'यादृश्मिन्धायि तमपस्यया विदत्' । यादृशेऽधायि तमपस्यया विदत ॥ 'उस्रःपितेव जारयायि यज्ञैः' । उस्र इवगोपिताऽजायि यज्ञैः ॥१५॥

(५९–असूर्तेसूर्ते=असु–समीरिताः सुसमीरिते) 'वायु से प्रेरे हुए (माध्यमिक देवगण–मेघ), अच्छे प्रेरे हुए निश्चल ठहरे हुए लोक (अन्तरिक्ष) में जो इन सब भूतों ( प्राणियों ) को ( जल बरसाकर ) उत्पन्न करते हैं ( त आयजन्त=वह यजन करते हैं–१०।८२।४)(असु+ऊर्ते) = असु–समीरिताः=(असु=प्राण=वायु) वायु से प्रेरे हुए (सु+ऊर्ते) सुसमीरिते=अच्छे प्रेरे हुए में। वायु से प्रेरे हुए माध्यमिक देवगण (मेघ) जल से पृथिवी को तृप्त करते हुए भूतों को बनाते हैं। 'वह यजन करते हैं' यह पहले आचुका है प्रतिनिर्देश*( ६०–अभ्यक् )' हे इन्द्र शत्रुओं के सम्मुख जानेवाली वह तेरी वर्छी'(१।१६९।३)(अभ्यक्=)न मुझे प्राप्त हो(अ+मा+अच्)अथवा सीधी गई (अभि+अच्)(६१–यादृश्मिन्=यादृशे) 'जैसे में ( जैसी कामना में, मन को ) धारण करता है, उसको कर्म से पाता है ( ५।४४।८ ) । (६२–जारयायि=अजायि) '(गौओं के) पिता साण्ड की न्याई ( अग्नि ) यज्ञों द्वारा प्रकट होता है ( जैसे साण्ड गौओं से मानों अपने ही नए रूपों से प्रकट होता है–६।१२।४ ) ॥ १५ ॥

'प्रवोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्नियोत वाजाः' । प्रास्थुर्वो जोषयमाणा अभवत

* 'ये' का प्रति योगी 'तें' मन्त्र के पूर्वार्ध में आचुका है।

सर्वेऽग्रगमनेनेति वाग्रगरणेनेति वाग्रसम्पादिन इति वा । अपिवाऽग्रमित्येतदनर्थकमुपबन्धमाददीत ॥ 'अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम्' । अद्धीन्द्र प्रस्थितानीमानि हवींषि चनो दधिष्व । चन इत्यन्ननाम । पचतिर्नामीभूतः । 'तं मेदस्तः प्रति पचताग्रभीष्टाम्'इत्यपि निगमो भवति । अपि वा मेदसश्च पशोश्च सात्त्वं द्विवचनं स्याद्यत्र ह्येकवचनार्थः प्रसिद्धं तद्भवति । 'पुरोडा अग्ने पचतः' इति यथा । शुरुध आपो भवन्ति शुचं संरुन्धन्ति । 'ऋतस्य हि शुरुधःसन्ति पूर्वीः'इत्यपिनिगमो भवति । अमिनोऽमितमात्रो महान्भवत्यभ्यामितो वा । 'अमिनः सहोभिः'इत्यपि निगमो भवति।जजझतीरापो भवन्ति शब्दकारिण्यः । 'मरुतो जजझतीर्वः'इत्यपि निगमो भवति ।अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वा । अस्मभ्यमप्रतिष्कुतः'इत्यपि निगमो भवति । शाशदानःशाशाद्यमानः 'प्र स्वां मतिमतिरच्छाशदानः' इत्यपि निगमो भवति ॥ १६ ॥

(६३—अग्रियाः=मुख्याः)तुम्हें लक्ष्य करके प्यार करते हुए (सोम तुम्हारी ओर) प्रस्थित हुए हैं । हे वाजाः (हेऋभुओ) तुम सब मुखिया बनो (४।३४।३) प्रस्थित हुए हैं तुम्हारी ओर प्यार करते हुए । होवो सारे । (अग्रियाः) आगे चलने वाले वा आगे

निगलने वाले वा आगे तय्यार करने वाले। अथवा 'अग्र'ही अनर्थक आगम ग्रहण किये हों (अर्थात् अग्र से स्वार्थ में 'इय' आकर अग्रिय बना है) (६४—चनस्=अन्न, ६५—पचता=पक्वानि) ' हे इन्द्र यह हवियें जो (तेरी ओर) प्रस्थित हुई हैं, इनको भक्षणकर, अन्न को, पके हुए (पुराडाशों) को और सोम को (अपने उदर में) डाल, (१०।११६।८) । भक्षण कर हे इन्द्र प्रस्थित हुई इन हवियों को । अन्न को धारण कर । चनस्, अन्न का नाम है। (पचता, यह) पच् धातु नाम हुआ है (अर्थात् क्रियापद नहीं, किन्तु पच् का नाम पचत होकर पचता विभक्त्यन्त रूप है)। 'उस पके हुए को (हे इन्द्राग्नी) चर्बी से स्वीकार करो' यह भी निगम होता है (यहां पचता=पचतं के स्थान है) अथवा मेदस् का और पशु का (अर्थात् दोनों मिले हुओं का) द्रव्यप्रधान द्विवचन होसकता है (अर्थात् जैसे 'द्वा सुपर्णा सयुजा सखाया' द्विवचन हैं, इसी तरह 'पचता' द्विवचन है,अर्थात् पके हुए उस पशु को यह अर्थ नहीं, किन्तु पकेहुओं उस (पशु) और चर्बी को, इस प्रकार दोनों का विशेषण है)। क्योंकि जहां एक वचन का अर्थ है,वहां प्रसिद्ध रूप है (पचतः)जैसे यहां है' हे अग्ने!पका हुआ पुरोडाश (तेरेलिये तय्यार किया गया है, (३।२८।२) । (६६— ) शुरुध्=जल हैं। शोक (गर्मी) को रोकते हैं (शुच्+रुध् से) । 'ऋत के बहुत जल हैं (४।२३।८) यह भी निगम होता है । (६७—) अमिनः=न मिनी मात्राओं वाला=महान् । अथवा हिंसा न किया हुआ 'वर्णों से न मिने परिमाण वाला ( वा हिंसा न किया हुआ—इन्द्र —६।१९।१) यह भी निगम होता है । (६८—) जज्झतीः=जल हैं—शब्द करने वाले'मरुत(शब्द करते हुए—)जलों की न्याईं(५।५२।

६) यह भी निगम होता है (६९—) अप्रतिष्कुतः = न पराङ्मुख किया हुआ अथवा न फिसला हुआ। 'हमारे लिये (मेघ को खोलदे, तू जो) किसी से पराङ्मुख नहीं किया गया (वा कहीं नहीं फिसला है) (१।७।६) यह भी निगम होता है। (७०—) शाशदानः = वार २ मारते हुए 'वृत्र को वार २ मारते हुए (इन्द्र) ने अपनी मति (ख्याल) को वढाया (१।३३।१३) यह भी निगम होता है ॥ १६ ॥ इति तृतीयः पादः ॥

सृपः सर्पणादिदमपीतरत्सृप्रमेतस्मादेव सर्पिर्वा तैलं वा। 'सृप्रकरस्नमूतये' इत्यपि निगमो भवति। करस्नौ बाहू कर्मणां प्रस्नातरौ। सुशिप्रमेतेन व्याख्यातम्। 'वाजे सुशिप्र गोमति' इत्यपि निगमोभवति। शिप्रे हनू नासिके वा हनुर्हन्तेर्नासिका नसतेः। 'विष्यस्व शिप्रे वि सृजस्व धेने' इत्यपि निगमो भवति। धेना दधातेः। रंसु रमणात्। 'स चित्रेण चिकिते रंसु भासा' इत्यपि निगमो भवति। द्विबर्हा द्वयोःस्थानयोः परिवृढो मध्यमे च स्थाने उत्तमे च। 'उत द्विबर्हा अमिनः सहोभिः' इत्यपि निगमो भवति। अक्र आक्रमणात्। 'अक्रो न बभ्रिःसमिथे महीनाम्' इत्यपिनिगमो भवति। उराण उरु कुर्वाणः। 'दूत ईयसे प्रदिव उराणः' इत्यपि निगमो भवति। स्तिया आपो भवन्ति-स्त्यायनात्। 'वृषा सिन्धूनां वृषभःस्तियानम्' इत्यपि

निगमो भवति। स्तिपा स्तियापालन उपस्थितान्पालयतीति वा। 'स न स्तिपा उत भवा तनूपाः' इत्यपि निगमो भवति। जवारु जवमानरोहि जरमाणरोहि गरमाणरोहीति वा।'अग्रे रुप आरुपितं जवारु'इत्यपि निगमो भवति। जरूथं गरूथं गृणातेः 'जरूथं हन्यक्षिराये पुरन्धिम्'इत्यपि निगमो भवति। कुलिश इति वज्र नाम कुलशातनो भवति॥ 'स्कन्धाँसीव कुलिशेना विवृक्णाऽहिः शयत उपपृक् पृथिव्याः'। स्कन्धो वृक्षस्य समास्कन्नो भवति। अयमपीतरः स्कन्ध एतस्मादेवास्कन्नं काये। अहिः शयत उपपर्चनः पृथिव्याः। तुञ्जस्तुञ्जतेर्दानकर्मणः॥१७॥

(७१.—) सृप, फैलने से। यह दूसरा सृप भी इसी से है घी वा तेल। 'फैली हुई भुजाओं वाले (इन्द्र) को रक्षा के लिये (बुलाते हैं—८।३२।१०) यह भी निगम होता है। करस्नाँ = भुजाएं हैं—कर्मों के संवारने वाली। (७२—सुशिप्रः) इसी से (सृप) से व्याख्या किया गया। (शिप्र = हनु वा नासिका। सुशिप्र = अच्छे हनुवाला वा अच्छी नासिका वाला)। 'हे अच्छी हनुवाले (वा अच्छी नासिका वाले इन्द्र) गौओं वाले संग्राम में (हमें तीक्ष्ण बना—८।७१।८) यह भी निगम होता है। शिप्रे = दोनों हनु वा दोनों नासिकाएं। हनु = हन् (अ०प०) से। नासिका नस् (भ्वा०आ०) से। 'दोनों हनू (सोम पान के लिये, वा दोनों नासिकाएं

सोम के सूंघने के लिये) खोल, और दाढें खुलीकर' (१।१०१।१०) यह भी निगम होता है। धेना, धा (जु०उ०) से है। (७३- रंसु = रमणीयेषु) रंसु रमण से। 'वह (अग्नि) रंगीले प्रकाशों से रमणीय (स्थानों) में ज्ञात होता है' (२।४।९) यह भी निगम होता है। (७४-) द्विवर्हाः = दोनों स्थानों में बढ़ा हुआ=मध्यम स्थान में और उत्तम स्थान में 'और दोनों लोकों में बढ़ा हुआ, बलों से अपरिमितमात्रा वाला' (६।१९।२) यह भी निगम होता है (देखो पूर्व ६।१६में) (७५-) अक्रः = आक्रमण से ( जिसपर आक्रमण करते हैं-प्राकार = कोट ) 'कोट की न्याई धारने वाला संग्राम में बड़ी (सेनाओं) का (३।१।१२) यह भी निगम होता है (७६-) उराणः=बहुत करता हुआ। 'दूत होकर तू जाता है अत्यन्त चमकता हुआ और(थोड़ी भी हवि को)बहुत करता हुआ (४।७।८) यह भी निगम होता है। (७७-) सितयाः, जल होते हैं। संघात होने से (बर्फ बने हुए संहत होते हैं)'तू नदियों का सेचने वाला है और(संहतहुए जलों का सेचने( = गिराने)वालाहै'(६।४४।२१) यह भी निगम होता है।(७८-) स्तिपाः=जलों का रक्षक अथवा आए का रक्षक(उपस्थित +पा,से) 'सो तू (हे अग्ने) हमारे जल का रक्षक(दृष्टि का रक्षक)और श र का रक्षक हो(१०।६९।४)(७९-) जवारु=(सूर्यमण्डल) वेग वाला हुआ चढ़ता है(जव+रुह, से) वा निकट आता हुआ (सम्मुख आता हुआ) चढ़ता है (जर+रुह् से) वा (ओस को निगलता' हुआ चढ़ता है (गर+रुह, से) 'उगाने वाली (पृथिवी) के सम्मुख सूर्य मण्डल रखा गया है (४।५।७) यह भी निगम होता है। (८०-) जरूथं=बोलने वाला, गॄ ( क्र्या० पा० से ) 'स्तोत्र को पहुंचाता हुआ ऐश्वर्य के लिये बहुत बुद्धि वाले (देवगण) को

पूज (७।९।६) यह भी निगम होता है। (८१–)कुलिश, वज्र का नाम है। किनारों का काटने वाला होता है। 'वज्र से टुकड़े२ किये डालों की न्याई वृत्र पृथिवी को आलिंगन करके लेटता है' (१।३२।५) स्कंधस् (यहां)वृक्ष का(कंधा) है। (वृक्ष पर)लगा हुआ होता है। यह दूसरा स्कन्ध भी इसी से है, शरीर पर लगा हुआ होता है। 'वृत्र लेटता है पृथिवी को आलिंगन करके' (८२–) तुञ्ज, दान अर्थ वाले तुञ्ज (भ्वा० पा०) से ॥ १७ ॥

'तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः। नविन्धे अस्य सुष्टुतिम्'। दानेदाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेः। वर्हणा परिवर्हणा। 'बृहच्छ्रवा असुरो वर्हणा कृतः' इत्यपि निगमो भवति ॥१८॥

दानदान में वज्र धारी इन्द्र के जो उत्तम स्तोत्र हैं, उनसे इसकी उत्तम स्तुति नहीं पाता हूं (उस की दात की स्तुति इमसे हो नहीं सकती–१।७।७) दान २ में जो उत्तम स्तोत्र हैं इन्द्र वज्र धारी के, उनसे इसकी स्तुति की समाप्ति नहीं पाता हूं। (८३–) वर्हणा = बढ़े हुए से वा मारने से 'बड़ी ध्वनिवाला बलवान् (वृत्र) बढ़े हुए वा मारनेवाले(वज्र)से (बरसानेवाला)बनायागया* (१।५५।३) यह भी निगम होता है ॥१८॥

'यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह। अपाप शक्रस्ततनुष्टिमूहति तनू-

---

* बड़े यशवाला बल वाला (अपने घोड़ों से)पुरः कृतः=पूजा हुआ (इन्द्र) सायण)

शुभ्रं मघवा यः कवासखः'। घ्रंस इत्यहर्नाम ग्रस्यन्तेऽस्मिन् रसाः। गोरूध उद्धततरं भवत्युपोन्नद्धमिति वा। स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते। स योऽस्मा अहन्यपि वा रात्रौ सोमं सुनोति भवत्यह द्योतनवान्। अपोहत्यपोहति शक्रस्ततनिषुं धर्मसन्तानादपेतमलङ्करिष्णुमयज्वानं तनूशुभ्रं तनूशोभयितारं मघवा यः कवासखो यस्य कपूयाः सखायः। 'न्याविध्यदिलीबिशस्य दृह्ळा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः'। निरविध्यदिलाबिलशयस्य दृढानि व्यभिनच्छृङ्गिणं शुष्णमिन्द्रः ॥१९॥

(८४) ततनुष्टिः=ततनिषुः=(धर्म मे परे रहकर, धनमात्रका) फैलानेवाला। 'जो इस (इन्द्र) के लिये दिन के समय अथवा जो रात के समय सोम बहाता है, वह दीप्तिमान् होता है। शक्तिमान् धनदाता (इन्द्र) उसका नाशकरता है, नाशकरता है, जो (धर्म में न लगाकर धनको) फैलाए जाता है, और शरीरको ही सजाता है (न कि हृदय को) और जो पापियों का साथी है (५।३४।३ घ्रंस, दिन का नाम है, इसमें रस (ओस के विन्दु) ग्रसे जाते हैं। ऊधस्=गौका ऊधस् (हवाना) ऊंचा हुआ होता है (उद्+हन् सेऊधस्) अथवा (उदरके) समीपवन्धा होता है (उप+हन (अ०प०से)। रस (ओस) के देने की समानता से रात्रि भी ऊधस् कहलाती है (जैसें हवाना दूध देता है वैसे रात्रि ओस देती है, इस धर्म से हवाने का नाम रात्रिके लिये बोलागया है)'सो जो इसकेलिये दिन में

भी वा रात्रि में भी सोम बहाता है, वह दीप्तिमान् होता है' नाश करता है नाश करता है शक्तिमान् (इन्द्र)। तितनिर्षु=धर्म के फैलाव से गिरे हुए अपनी सजावट में लगे हुए यज्ञ से रहित को-तनूशुभ्रं=शरीर के सजानेवाले को। और 'कवासखः' जिस के पापी साथी हैं (उसको नाश करता है) (८५-) इळीविशस्य=इळाबिलशयस्य 'पृथिवी की बिल में लेटे हुए (वृत्र) के दृढ़ स्थानों को (इन्द्र ने) रौंध दिया और चोटियों वाले बलवान् (वृत्र) को टुकड़े २ किया (१।३३।१२)॥१९॥

'अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः। गोर्न पर्व विरदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै'। अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः। कियेधाः कियद्धा इति वा क्रममाणधा इति वा। गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय। भूमिर्भ्राम्यतेः। 'भूमिरस्यृषिकृन्मर्त्यानाम्'इत्यपि निगमो भवति। विष्पितो विप्राप्तः। 'पारं नो अस्य विष्पितस्य पर्षन्'इत्यपि निगमो भवति॥२०॥

(८६-कियेधाः=कियद्धा वा क्रममाणधाः) 'हे इन्द्र तेज़ी करता हुआ तू इस वृत्र के लिये वज्र प्रहार कर, तू जो (सब पर) ईशन करने वाला और कितने (बड़े बल) का धारने वाला (वा आक्रमण करने वाले मरुतों का धारने वाला है) जलों को चाहता हुआ तू (पृथिवी की ओर) जलों के चलने के लिये, टेढे वज्र से पशु के जोड़ों की न्याईं (वृत्र को) काट (१।६१।१२) जल्दी तेज़ी करता हुआ तू इस वृत्र के लिये वज्रप्रहार कर,

ईशान करने वाला, कियेधाः=कितने (बल)का धारने वाला, अथवा चलते हुओं को धारने वाला। 'पशु के पर्वों की न्याईं काट, मेघ के जलों की इच्छा करता हुआ, जलों के चलने के लिये। (८७) भृमिः, भ्रम (दि० पा०) से। 'तू (हे अग्ने) घुमाने वाला (परलोक में लेजाने वाला और इस लोक में लाने वाला) है, तू मनुष्यों को ऋषि बनाने वाला है' (१।३१।१६) यह भी निगम होता है। (८८–) विष्पितः=विविध रूप से प्राप्त हुआ। 'विविध रूप से प्राप्त हुए (इस संसार मार्ग) के वह (मित्र वरुण अर्यमा) हमें पार लेजाएं (७।६०।७) यह भी निगम होता है ॥२०॥

"तन्नस्तुरीपमद्भुतं पुरुवारं पुरुत्मना। त्वष्टा पोषाय वि ष्यतु राये नाभानो अस्मयुः" ॥ तन्नस्तूर्णापि महत्सम्भृतमात्मना त्वष्टा धनस्य पोषाय विष्यत्वित्यस्मयुरस्मान्कामयमानः। रास्पिनो रास्पी रपतेर्वा रसतेर्वा। 'रास्पिनस्यायोः' इत्यपि निगमो भवति। ऋञ्जतिः प्रसाधनकर्मा। 'आ व ऋञ्जस ऊर्जां व्युष्टिषु' इत्यपि निगमो भवति। ऋजुरित्यप्यस्य भवति। 'ऋजुनीती नो वरुणः' इत्यपि निगमो भवति। प्रतद्वसू प्राप्तवसू। 'हरी इन्द्र प्रतद्वसू अभि स्वर' इत्यपि निगमो भवति ॥२१॥

(८९–तुरीपं=तूर्णापि=जल्दी व्यापने वाला=जल) 'हमें प्यार करने वाला त्वष्टा (वैद्युत अग्नि) हमारे धन (पशुओं) की पुष्टि के लिये, हमारे मध्य में उस जल को खोले, जो जल्दी व्यापने वाला अद्भुत (महा गुणकारी) बड़े (स्थान) को ढांपने वाला और स्वरूप से बड़ा हो (१।१४२।१०) उस जल्दी व्यापने वाले

बड़े स्वरूपसे पुष्ट करो, त्वष्टा हमारे धनकी पुष्टिके लिये खोलो। अस्मयुः = हमें प्यार करने वाला। (९०—) रास्पिनः, रास्पी, रपवा रस (भ्वा० प०) से (रपनशीलो वा रसनशीलो वा = शब्द करने वाला) '(हे अश्वियो) शब्द करने वाले को (वृष्टि) जल की प्राप्ति के लिये '(यद्वा स्तुति करने वाले को पुत्र की प्राप्ति के लिये')(आयुः जल वा मनुष्य का नाम है) (१।१२२।४) यह भी निगम होता है। (९१—) ऋञ्जतिः, सजाने अर्थवाला है '( हे ग्रावो ) उषाओं के खुलने पर तुम्हें सजाता हूं' ( १० । ७६ । १ ) यह भी निगम होता है। ( ९२— (९२—ऋजुनीती ऋजु भी इसी ऋञ्जतिका है 'सरल सीधी चाल से हमें वरुण (चलावे १।९०।१) यह भी निगम होता है। (९३—) प्रतद्वसू = पाए धन वाले ' हे इन्द्र (ऋजीष और धाना रूपी) धन पाए हुए अपने दोनों घोड़ों को (जोड़ कर यज्ञ की ओर) जा' (८।१३।२७) यह भी निगम होता है ॥२१॥

'हिनोत नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम्। ऋतस्य योगे विष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः'॥ प्रहिणुत नोऽध्वरं देवयज्याय, प्रहिणुत ब्रह्म धनस्य सननाय। ऋतस्य योगेयज्ञस्य योगे याज्ञे शकट इति वा। शकटं शकृदितं भवति शनकैस्तकतीति वा शब्देन तकतीति वा। 'श्रुष्टीवरीर्भूतनास्मभ्यमापः'। सुखवत्यो भवतास्मभ्यमापः॥ 'चोष्कूयमाण इन्द्र भूरि वामम्' ददादिन्द्र बहु वननीयम्॥ 'एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्'व्युदस्यत्येधमानानसुन्वतः सुन्वतोऽभ्यादधात्युभयस्य राजा दिव्यस्य च पार्थिवस्य च।

चोष्कूयमाण इति चोष्कूयतेश्चर्करीतवृत्तम् ॥ सुमत्स्व-यमित्यर्थः । 'उप प्रागात्सुमन्मे धायि मन्म'। उपप्रैतु मां स्वयं यन्मे मनोऽध्यायि यज्ञेनेत्याश्वमेधिको मन्त्रः। दिविष्टिषु दिव एषणेषु'—स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु'स्थूरः समाश्रितमात्रो महान्भवति । अणु-रनु स्थवीयांसमुपसर्गो लुप्तनामकरणो यथा सम्प्रति । कुरुङ्गो राजा बभूव कुरुगमनाद्वा कुलगमनाद्वा।कुरुः कृन्ततेः क्रूरमित्यप्यस्य भवति । कुलं कुष्णातेर्विकु-षितं भवति । दूतो व्याख्यातः । जिन्वतिः प्रीतिकर्मा । 'भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः'इत्यपि निगमो भवति ॥२२॥

(९४—हिनोत = प्रहिणुत)'भेजो हमारे यज्ञको (हे ऋत्विजो) देवताओं की पूजाके लिये, भेजो ब्रह्म (स्तुति) को धनों की प्राप्ति के लिये, यज्ञ के संयोगमें ऊधम् (गौका हवाना जैसे दूधसे भरा होता है, वैसे सोमरससे भरे अधिषवणचर्म) को खोलो हे(सोम से मिले हुए) जलो हमारे लिये सुखवाले होवो(१०।३०।११) भेजो हमारे यज्ञ को देवपूजा के लिये, भेजो ब्रह्म को धनकी प्राप्ति के लिये । 'ऋतस्य योगे' = यज्ञ के सम्बन्ध में,अथवा यज्ञ सम्बन्धी छकड़में । शकट = (आगे जुड़ा हुआ बैल जो गोबर करता है उस) गोबर से लिबड़ा होता है । अथवा (भार से दबा हुआ ) धीरे २ चलता है, अथवा शब्द करता हुआ चलता है । 'सुखवाले हमारे लिये होवो हे जलो' । (९५—चोष्कूयमाणः ॥

ददत्) 'हे इन्द्र प्रभूत धन देता हुआ तू (हमारे लिये व्यवहारी न धन १।३३।२) देताहुआ हे इन्द्र प्रभूत, भेजनेयोग्य (धन)(९६–चोष्कूयते = व्युदस्यति)'बढ़े हुवों (ऊंचे आए हुवों) का शत्रु, दोनों (दिव्य और मानुष धनों) का राजा इन्द्र (अयज्वा) मनुष्यों को परे फेंकता है, और (यज्ञशील) मनुष्यों को स्थापन करता है' (६।४७।१६) फेंकता है बढ़े हुवों को जो सोम नहीं बहाते, और सोम बहानेवालों को स्थापन करता है। दोनों दिव्य और पार्थिव (धन) का राजा। चोष्कूयमाणः और चोष्कूयते यह दोनों 'कु' के यङ्लुगन्त के प्रयोग हैं। (९७–) सुमत् = स्वयं, यह अर्थ है। 'स्वयं मेरे पास आवे, जो (फल) मेरे मन ने ध्यान किया है (१।१६२।७)प्राप्त हो मुझे वह स्वयं जो मेरे मन ने ध्यान किया है यज्ञ से,यह अश्वमेध सम्बन्धी मन्त्र है।(९८)दिविष्टिषु = स्वर्ग के ढूंढने वालों में (जिन क्रिया से स्वर्ग को जाना चाहते हैं,वह क्रियाएं दिविष्टि हैं) सैंकड़े घोड़ों से युक्त बहुत बड़ा धन हमने कुरुङ्ग (राजा) की स्वर्ग के ढूंढनेवाली (यागक्रियाओं में पाया है (८।४।१९) स्थूरः = इकट्ठे आश्रयलिये अवयवों वाला (बहुतसे अवयवोंवाला, श्रि+मात्रा से) महान् होता है (स्थूल के प्रसंगसे अणु का निर्वचन करते हैं) अणु मोटे के पीछे होता है, (अनु) उपसर्ग है (आगेआए) प्रत्यय का लोप होकर, जैसे सम्प्रति ( साम्प्रतं के अर्थ में प्रत्यय का लोप होकर बोला जाता है ) कुरुङ्ग राजा हुआ है। कुरुओं पर चढ़ाई करने से, वा शत्रु कुल के प्रति जाने से। कुरु, कृत (तु० उ०) से है (शत्रुओं को काटता है)। क्रूर भी इसी का है। कुल कुष् (क्र्या०प०) से है। खिचाहुआ ( फैलाहुआ ) होता है। (९९– इत व्याख्या किया गया है (५।१९ में) (१००–) जिन्वति, प्रीति अर्थवाला है।

'भूमिको मेघ तृप्त करते हैं, और द्यौ को अग्नियें तृप्तकरती हैं, (१।१६४।५१) यह भी निगम होता है ॥ २२ ॥ चतुर्थः पादः

अमत्रोऽमात्रोमहान्भवत्यभ्यमितो वा । 'महाँ अमत्रो वृजने विरप्शी' इत्यपि निगमो भवति।'स्तवे वज्र्यृचीषमः'। स्तूयते वज्र्यृचा समः। अनर्शरातिमनश्लीलदानमश्लीलं पापकमश्रिमद्विषमम्। 'अनर्शरातिं वसुदामुप स्तुहि'इत्यपि निगमोभवति। अनर्वाऽप्रत्यृतोऽन्यस्मिन् । 'अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः'।अनर्वमप्रत्यृतमन्यस्मिन्वृषभं मन्द्रजिह्वं मन्दनजिह्वं मोदनजिह्वमिति वा। बृहस्पतिं वर्धय नव्यमर्कैरर्चनीयै स्तोमैः । असामि सामिप्रतिषिद्धं सामि स्यतेः । 'असाम्योजो बिभृथा सुदानवः' असुसमाप्तं बलं बिभृत कल्याणदानाः ॥२३॥

(१०१—) अमत्रः = परिमाण से बाहर, महान् होता है, अथवा सम्मुख जाने वाला (अम, भ्वा० प० से) '(इन्द्र) महान् (बड़े सामर्थ्य वाला) परिमाण से बाहर, संग्राम में रुलाने वाला (वा आह्वान करने वाला) है।(३।३६।४)यह भी निगम होता है। (१०२—ऋचीषमः = ऋचासमः) 'स्तुति किया जाता है ( इन्द्र ) वज्र वाला जो ऋचा के तुल्य है(ऋचा से जो उस की महिमा गाई जाती है, वह उस की बढ़ कर स्तुति नहीं होती—१०।२२।२ ) स्तुत किया जाता है, वज्र वाला ऋचा के जो बराबर है (१०३—)

अनर्शराति = न शोभा हीन दान वाले को । अश्लील = शोभा हीन होता है, न श्रीवाला, न सम । 'न शोभा हीन दान वाले (जिसका दान शोभा युक्त है) धन दाता (इन्द्र) की स्तुति करो' (८।८८।४) यह भी निगम होता है, (१०४—) अनर्वा = न दूसरे पर आश्रय किये हुए = स्वप्रधान 'न दूसरे पर सहारा लिये, शक्तिमान्, हर्षकारी ध्वनिवाले, स्तुति के योग्य बृहस्पति को स्तोत्रों से बढ़ाओ'(१।१९०।१) अनर्वं = न दूसरे पर सहारा लिये। शक्तिमान् हर्षकारी ध्वनि वाले,(मन्द्र=मद से वा मुद से है)बृहस्पति को बढ़ाओ,स्तुति के योग्य को,अर्कैः = आदरणीय स्तोत्रों से । (१०५—) असामि = समाप्त का निषेध । सामि । षो (अन्त कर्मणि, दि० प०) से है (समाप्त हुआ = अन्तवाला) ' हे अच्छे दानवालो (मरुतो) न समाप्त होने वाले (अनन्त) बलको धारण करो' (१।३९।१०) न समाप्त होने वाले बलको धारण करो हे अच्छे दान वालो ॥२३॥

'मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा। भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्'॥ मा चुक्रुधं त्वां सोमस्य गालनेन सदा याचन्नहं गिरा गीत्या स्तुत्या भूर्णिमिव मृगं न सवनेषु चुक्रुधं क ईशानं न याचिष्यत इति । गल्दा धमनयो भवन्ति गलनमासु धीयते ।'आ त्वा विशन्त्विन्दव आ गल्दा धमनीनाम्' । नानाविभक्ती त्वेते भवतः। आगलना धमनीनामित्यत्रार्थः ॥२४॥

(१०६—गल्दया = गालनेन) 'हे इन्द्र यज्ञों में सोम बहाने से

और स्तुतियों से युक्त हो सदा याचना करते हुए मैंने घूमने वाले चीते की तरह तुझे क्रुद्ध नहीं किया है, (क्योंकि) कौन है जो मालिक से याचना नहीं करता है (८।१।२०) मैंने तुझे क्रुद्ध नहीं किया है सोम के बहाने से सदा याचना करते हुए। गिरा = गीत से, स्तुति सेघूमने वाले (चित्र—)मृग की न्याई(न,इव केअर्थ में है) यज्ञों में। कौन मालिक से नहीं मांगेगा। गल्दा नाड़ियें होती हैं, रस इन में रखा जाता है। 'तुझ में सोम प्रवेश करें' (साम ३।१।१।४;८।२।२।१) 'नाडियोंके रस' (?)। दोनों भिन्न २ विभक्ति वाले हैं (पूर्व कहा—गल्दया, तृतीयैकवचन है, यह 'गल्दा' प्रथमाबहुवचन है) 'रस नाड़ियों के' यह यहां अर्थ है ॥२४॥

'न पापासो मनामहे नारायासो न जळ्हवः'। न पापा मन्यामहे नाधना न ज्वलनेन हीनाः। अस्त्यस्मासु ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरवोचत्।बकुरो भास्करो भयङ्करोभासमानो द्रवतीति वा

(१०७—जळ्हवः = अज्वलनाः = अग्नि हीन) हम (अपने आप को) पापी नहीं मानते हैं, क्योंकि न धन हीन हैं, न अग्नि (अग्नि होत्र) से हीन हैं(८।५०।११) हम अपने आपको पापी नहीं मानते हैं, न हम धनहीन हैं, न अग्नि से हीन हैं, हम में ब्रह्मचर्य, अध्ययन,तप और दान कर्म है,यह ऋषि (मन्त्र द्रष्टा) ने कहा है। (१०८—) बकुरः = प्रकाश करने वाला, भय देने वाला, वा प्रकाशता हुआ चलता है ॥२५॥

'यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा। अभि दस्युं बकुरेणाधमन्तोरु ज्योतिश्चक्रथुरार्याय'।

यवमिव वृकेणाश्विना निवपन्तौ। वृको लाङ्गलं भवति विकर्तनात्। लाङ्गलं लंगते र्लम्बतेर्वा लाङ्गूलवद्वा। लाङ्गूलं लगतेर्लङ्गतेर्लम्बतेर्वा। अन्नं दुहन्तौ मनुष्याय दर्शनीयावभिधमन्तौ दस्युं। बकुरेण ज्योतिषा वोदकेन वार्य्य ईश्वरपुत्रः। बेकनाटाः खलु कुसीदिनो भवन्ति द्विगुणकारिणो वा द्विगुणदायिनो वा द्विगुणं कामयन्त इति वा। 'इन्द्रो विश्वान्बेकनाटाँअहर्दृश उत क्रत्वा पणीँरभि'। इन्द्रो यः सर्वान्बेकनाटानहर्दृशः सूर्य्यदृशो य इमान्यहानि पश्यन्ति न पराणीति वाऽभिभवति कर्मणा पणींश्च वणिजः ॥२६॥

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने। गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥ पर्वतानामुपस्थादुपस्थाना दुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासति स्पर्धायां हर्षमाणे वा। गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा

---

* पूर्व २।२४ में कहा था 'तद् यद् छिवदुपरिष्टात्तद् व्याख्यास्यामः' वह यहां व्याख्या करते हैं।

प्रजवेते ॥ आर्त्नी अर्त्न्यौ वारण्यौ वारिषण्यौ वा । तयोरेषा भवति ॥३९॥

पर्वतों की गोद से निकल कर ( परस्पर वा समुद्र को ) प्यार करती हुई, ( घुड़शाला से ) खोली गई दो घोड़ियों की न्याईं स्पर्धा करती हुई ( एक दूसरी से आगे बढ़ना चाहती हुई ) दो गौओं की न्याईं शोभा वाली, दो माताओं की न्याईं ( बछड़ों को ) दूध चटाती हुई विपाट् और शुतुद्रि अपने जल से पूरा वेग दिखलाती हैं ( ३।३३।१ ) पर्वतों की गोद से। उशत्यौ=कामना करती हुई। दो घोड़ियों की न्याईं खुली हुई। वा इकट्ठी जुड़ी हुई। हासमाने=हास ( भ्वा०प० ) स्पर्धा में है। अथवा प्रसन्न हुई। दो गौओं की न्याईं। शुभ्रे=शोभन। माताओं की न्याईं चटाती हुई विपाट् शुतुद्रि जल से पूरे वेग से चलती हैं। ( ३३ ) आर्त्नी (=धनुष के सिरे ) पहुंचाने वाले ( बाणों के) ( ऋत गतौ )। वा अरण्यौ = अरणाईं ) वेगानों के योग्य वा हनन करने वाले। उनकी यह है ॥ ३९ ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृता-मुपस्थे।अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ते आचरन्त्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थानेऽपविध्यतां शत्रून्संविदाने आर्त्न्याविमे विघ्नत्यावमित्रान् ॥ शुनासीरौ शुना वायुः शु एत्यन्तरिक्षे सीरः आदित्यः सरणात्। तयोरेषा भवति ॥४०॥

शत्रुओं को नष्ट करती हुई यह दोनों (धनुष्कोटी) समान मन वाली दो स्त्रियों की न्याई आचरण करती हुई (इकट्ठी वाणों को प्रेरती हुई) माता जैसे पुत्र को वैसे अपनी गोदमें धारती हैं (बाण को), यह दोनों एक मत होकर शत्रुओं को वींध डालें (६।७५।४) (३४-) शुनासीरौ = शुन, वायुः, वह जल्दी चलता है अन्तरिक्ष में, (शु+इ) सीर = सूर्य है, चलने से, उन की यह है ॥४० ॥

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुप सिञ्चतम् ॥ इति सा निगदव्याख्याता ॥ देवी जोष्ट्री देव्यौ जोषयित्र्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा सस्यं च समा चेति कात्थक्यः। तयोरेष सम्प्रैषो भवति ॥ ४१ ॥

हे शुना सीरौ मेरी इस वाणी को सेवन करो, जो द्यौ में तुम ने जल बनाया है, उस से इस (पृथिवी) को सींचो (४।५७।५) यह पाठ से व्याख्यात है। (३५-) देवी जोष्ट्री = दो देवियें (सब की) तृप्त करने वाली। या द्यौ वा पृथिवी हैं, या दिनरात हैं। खेती और वरस हैं यह कात्थक्य मानता है। उन का यह सम्प्रैष * है ॥४१॥

देवी जोष्ट्री वसुधिती ययोरन्याघा द्वेषांसि यूयवदान्या वक्षद्वसु वार्याणि यजमानाय वसुवने व-

* अध्वर्यु वा उस के किसी साथी का मन्त्र के अन्त में यज कह कर होता को देवता विशेष के यजन की प्रेरणा सम्प्रैष होता है।

सुधेयस्य वीतां यज ॥ देवी जोष्ट्री देव्यौ जोषयित्र्यौ वसुधिती वसुधान्यौ ययोरन्याघानि द्वेषांस्यवया-वयत्यावहत्यन्या वसूनि वननीयानि यजमानाय वसुवननाय च वसुधानाय च वीतां पिबेतां कामय-तां वा । यजेति सम्प्रेषः ॥ देवी ऊर्जाहुती देव्या ऊर्जाह्वान्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा सस्यं च समाचेति कात्थक्यः । तयोरेष सम्प्रेषो भवति ॥

दो देवियें तृप्त करने वाली, वसुधिती=धन के रखने वाली जिनमें से एक पापोंको द्वेषोंको दूर हटाती है । और लाती है दूसरी अच्छे धनों को यजमान के लिये । धन के बांटने के लिये और धन के रखने के लिये ॥ वीतां = पियो वा कामना करो । यज, (मैत्रावरुण कहता है हे होतः) 'यज' यह सम्प्रैष है । (३६-) देवी ऊर्जाहुती = दो देवियें अन्नरस के बुलाने वाली । द्यावा पृथिवी हैं, या दिन-रात हैं । खेती और वरस हैं कात्थक्य मानता है । उन का यह सम्प्रैष है । ९२ ।

देवी ऊर्जाहुती इषमूर्जमन्या वक्षत्सग्धिं सपी-तिमन्या नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयजमाने अधातां वसुवने वसु-धेयस्य वीतां यज ॥ देवीऊर्जाहुती देव्या ऊर्जाह्वा-न्यावन्नं च रसं चावहत्यावहत्यन्या सहजग्धिं च स-हपीतिं चान्या नवेन पूर्वं दयमानाः स्याम पुराणेन

नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेतां वा । यजेति सम्प्रैषः ॥ ४३ ॥

दो देवियें अन्नरस के बुलाने वाली । ( उन में से ) एक अन्नरस (दूधादि) को लावें, दूसरी ( बन्धुओं इष्टमित्रों के साथ ) इकट्ठा खाना और इकट्ठा पीना लावे । हम नए (अन्नरस) से पुराने की और पुराने से नए ( अन्नरस ) की रक्षा करते हुए हों, उस अन्नरस को, अन्नरस के बुलाने वाली, बल वाली दोनों देवियें, धन के बांटने के लिए और धन के रखने के लिए पियें वा कामना करें । यज, यह सम्प्रैष है , यज यह सम्प्रैष है ।९.३।

# दशमोऽध्यायः

---

अथातो मध्यस्थाना देवताः—तासां वायुः प्रथमागामी भवति । वायुर्वातेर्वेतेर्वा स्याद्गतिकर्मणः । एतेरिति स्थौलाष्ठीविरनर्थको वकारः । तस्यैषा भवति ॥

( पृथिवी स्थानी देवता कह दिये ) अब मध्य स्थानी देवता ( कहते हैं ) । उन में से वायु पहले आने वाला है ( वर्षा का मुख्य हेतु होने से ) (१.–) वायु, वा ( अ०प० ) से है, वा गति अर्थ वाले वी (अ०प०) से है, ई ( अ०प० ) से है यह स्थौलाष्ठी त्रिमानता है ( इस पक्ष में ) व पूर्व अनर्थक ( आगममात्र ) है ( एति = सदा चलता है, आयुः = वायुः ) उस की यह है ।१।

"वायवा याहि दर्शतेमे सोमा अरङ्कृताः। तेषां पाहि श्रुधी हवम्" ॥ वायवायाहि दर्शनीयेमे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानमिति। कमन्यं मध्यमादेवमवक्ष्यत्। तस्यैषापरा भवति ॥२॥

हे वायु हे दर्शनीय आ, यह*सोम तय्यार किए गए हैं, उनको पी, हमारे बुलावे को सुन (१।२।१) मध्यम से भिन्न किस दूसरे को ऐसे (सोमपी) कहता। उस की यह और है। २।

"आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः। अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्" ॥ आससृवांसोऽभिबलायमानमिन्द्रं कल्याणचक्रे रथे योगाय रथ्या अश्वा रथस्य वोढार ऋज्यन्त ऋजुगामिनोऽन्नमभिवहेयुर्नवं च पुराणं च। श्रव इत्यन्ननाम श्रूयत इति सतः। वायोश्चास्य भक्षो यथा न विदस्येदिति। इन्द्रप्रधानेत्येके नैघण्टुकं वायुकर्म। उभयप्रधानेत्यपरम् ॥ वरुणो वृणोतीति सतः। तस्यैषा भवति ॥३॥

लगातार चलते हुए, सीधा चलते हुए, रथ में जुड़े हुए, घोड़े, अच्छे पहियों वाले रथ पर स्थित बलशाली इन्द्र को नए और

---

* सोमपान का प्रसिद्ध सम्बन्ध मध्यम से है, सोम की तय्यारी मुख्यतया इन्द्र के लिये होती है।

पुराने अन्न ( हवि * ) की ओर ले आवें, जिस से वायु का अमृत (सोमरस ) घट न जाए (८।३७।३) लगातार चलते हुए, बलशाली इन्द्र को अच्छे पहियों वाले रथ पर जुड़ने के लिए। रथ्याः = रथ के ले जाने वाले, घोड़े। ऋज्यन्तः = सीधा चलने वाले। अन्न की ओर लावें नए और पुराने की ओर(नू चित = नए पुराने का नाम है) श्रवम् , अन्न का नाम है,सुना जाता है,ऐसा होते हुए से। जैसे इस वायु का भक्ष क्षीण न हो। कई कहते हैं। यह ऋचा इन्द्र-प्रधान है, वायु का कर्म इस में नैघण्टुक है, दूसरा पक्ष यह है, कि दोनों को प्रधान करके है (८२—) वरुण = घेरता है ( आकाशको) ऐसा होते हुए से। इस की यह है।३।

'नीचीनवारं वरुणः कवन्धं प्र ससर्ज रोदसी अन्तरिक्षम्। तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम' ॥ नीचीनद्वारं वरुणः कवन्धं मेघम्। कवनमुदकं भवति तदस्मिन्धीयते। उदकमपि कवन्धमुच्यते बन्धिरनिभृतत्वे कमनिभृतं च प्रसृजति। द्यावापृथिव्यौ चान्तरिक्षं च महत्त्वेन। तेन सर्वस्य भुवनस्य राजा यवमिव वृष्टिर्व्युनत्ति भूमिम्। तस्यैषाऽपरा भवति ॥४॥

वरुण ने मेघ को नीचे द्वार वाला बना कर द्यौ पृथिवी और अन्तरिक्ष के प्रति ( इनके हित के लिए ) छोड़ा, इस ( कर्म ) से

* सोम निचोड़ कर जो उसी समय होमा जाता है वह नया है और जो माध्यन्दिन सवन में वा द्वितीय सवन में होमा जाता है, वह पुराना है

सारे भुवन का स्वामी ( वरुण ) खेती को सेचने वाले की न्याईं भूमि को तर कर देता है (५।८५।३). वरुण नीचे द्वार वाले कवन्ध =मेघ को । कवन जल होता है, वह इस में रखा जाता है (कवन+धा ) जल भी कवन्ध कहलाता है। बन्ध धातु न गुप्त अर्थ में है, सुख कारी और न गुप्त होता है ( मेघ को देख कर सुख होता और भाप यद्यपि गुप्त होती है मेघ दीखता है ) छोडता है द्यौ पृथिवी और अन्तरिक्ष के प्रति महिमा से । उस से सारे भुवन का राजा खेती को सेचने वाले की न्याईं भूमि को तर करता है । उस की यह और है * । ४ ।

'तमू षु समना गिरा पितॄणां च मन्मभिः । नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे'॥ तं स्वभिष्टौमि समानया गिरा गीत्या स्तुत्या पितॄणां च मननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिः । ऋषिर्नाभको बभूव । यः स्यन्दमानानामासामपामुपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यतेऽथैष एव भवति । नभन्तामन्यके समे । मा भूवन्नन्यके सर्वे ये नो द्विषन्ति दुर्धियः पापधियः पापसंकल्पाः॥रुद्रो रौतीति

* पूर्व ऋचा में वरुण का वर्षा कर्म कहा है, पर यह कर्म सूर्य का भी हो सकता है इस से वरुण का मध्यम होना निश्चित नहीं होता इस लिए और ऋचा प्रमाण देते हैं जिस में वरुण के लिए प्रत्यक्ष मध्यम शब्द कहा है ।

सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा । 'यदरुदत्तद्रुद्रस्य रुद्रत्वम्' इति काठकम् । 'यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति हारिद्रविकम् । तस्यैषा भवति ॥५॥

उसी वरुण को मैं समान वाणी से, पितरों के स्तोत्रों से और नाभाक की प्रशंसाओं से स्तुति करता हूं *, जो जलों के (अन्तरिक्ष में) प्रकट होने पर सात बहिनों वाला † होता है, वह मध्यम है (उस की कृपा से) शत्रु सब न हों(नाश हों)(८।४१।२) उस की मैं स्तुति करता हूं समान, गिरा = गीति से, स्तुति से। और पितरों के मननीय = स्तोत्रों से। नाभाक की प्रशंसाओं से। ऋषि नाभाक हुआ है। जो (वरुण) सिन्धूनां बहते हुए इन जलों के उदय में। सात बहिनों वाला इस (वरुण) को कहता है वाणियों से (वाणियें बहिनें हैं)। वह मध्यम कहा जाता है, यही है। 'नभन्तामन्यके सर्वे' नष्ट हों और सारे, जो हमसे द्वेष करते हैं, पाप बुद्धि वाले, पाप संकल्पों वाले, (३–) रुद्र, (मेघ) शब्द करता है, ऐसा होते हुए से, अथवा अतिशय शब्द करता हुआ दौड़ता है। अथवा रोदयति से है (रुलाता है) 'जिस से वह रोया, यह रुद्र का रुद्रत्व है', यह कठ शाखा में है। और 'जिस से रोया, यह रुद्र का रुद्रत्व है' यह हारिद्रव (मैत्रायणीयों की शाखा विशेष) में है उस की यह है ।५।

"इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने। अषाळहाय सहमानाय वेधसे तिग्मायुधाय

* सु,उपसर्ग के संबन्ध से अभिष्टौमि,क्रियापद अध्याहृत किया है † सात बहिनें=अन्तरिक्ष में होने वाली सात वाणियें (दुर्गाचार्य)

भरता शृणोतु नः" ॥ इमा रुद्राय दृढधन्वने गिरः क्षिप्रषवे देवायास्वधावतेऽषाढायान्यैः सहमानाय विधात्रे तिग्मायुधाय भरत शृणोतु नस्तिग्मं तेजतेरुत्साहकर्मण आयुधमायोधनात् । तस्यैषापरा भवति ॥६॥

(हे स्तोताओ) यह स्तुतियें दृढ धनुष वाले, जल्दी बाणों वाले, अन्न वाले, न दबने वाले, दबाने वाले, विधान करने वाले, तीक्ष्ण शस्त्रों वाले रुद्रदेव के लिये धारण करो, वह (रुद्र हमारी स्तुतियों को) सुने (७।४६।१) तिग्म, उत्साह अर्थ वाले तिज (भ्वा०आ०) से है। आयुध = आयोधन से (इस से युद्ध करते हैं) उस की यह और है ।६।

"या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः । सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः"॥ या ते दिद्युदवसृष्टा दिवस्परि दिवोऽधि । दिद्युद् द्यतेर्वा द्युतेर्वा द्योततेर्वा । क्ष्मया चरति । क्ष्मा पृथिवी । तस्यां चरति तया चरति विक्ष्मापयन्ती चरतीति वा । परिवृणक्तु नः सा । सहस्रं ते स्वाप्तवचन भैषज्यानि मा नस्त्वं पुत्रेषु च पौत्रेषु च रीरिषः । तोकं तुद्यतेस्तनयं तनोतेः । अग्निरपि रुद्र उच्यते । तस्यैषा भवति ॥७॥

(हे रुद्र) जो तेरा शस्त्र (अशनि) द्यौ से छोड़ा हुआ पृथिवी पर चलता है, वह हमें छोड़ देवे, हे अच्छे पहुंचे हुए वचन वाले

( जिस के वचन का सब मान करते हैं ) तेरे सहस्र ओषध हैं ( वह हमें दे ) । हमारे पुत्रों में और पोतों में मत हानि पहुंचा ( ७। ४६।३ ) दिद्युत् द्यो ( अवखण्डने, दि० प० ) से है, वा द्यु (भ्र० प० ) से वा द्युत् ( भ्वा० आ० ) से है । 'क्ष्मया चरति' क्ष्मा= पृथिवी, उस में चलती है, वा उसके साथ विचरती है. अथवा हिंसा करती हुई विचरती है । छोड़दे हमें वह, सहस्र हैं तेरे है अच्छी पहुंची हुई आज्ञा वाले औषध,मत तू हमारे पुत्रों और पोतों में हानि पहुंचा । तोक ( पुत्र ) तुद ( तु०उ० ) से ( जन्म समय माता को पीड़ा देता है ) तनय ( पोता )तन् ( त० उ० ) से ( फैलाता है ) । अग्नि भी रुद्र कहलाती है, उसकी यह है ॥७॥

"जराबोध तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम्" ॥ जरा स्तुतिर्जरतेः स्तुतिकर्मणस्तां बोध तया बोधयितरिति वा । तद्विविड्ढितत्कुरु मनुष्यस्य मनुष्यस्य यजनाय । स्तोमं रुद्राय दर्शनीयम् ॥ इन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा । 'तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति' विज्ञायते । इदं करणादित्याग्रयणः । इदं दर्शनादित्यौपमन्यवः । इन्दतेर्वैश्वर्यकर्मण इन्दञ्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्वनाम् । तस्यैषा भवति ॥ ८ ॥

हे स्तुति से जागने वाले अग्ने मनुष्य मनुष्य के यज्ञ सम्पादन के लिये उस ( यजनस्थान ) में प्रवेश कर, तुझ भयंकर देवता के लिये ( यजमान ) दर्शनीय ( उत्तम ) स्तोम ( उच्चारता है— १।२७।१० ) जरा स्तुति है स्तुति अर्थ वाले जॄ ( भ्वा०प ) से, उस को ( स्तुति को ) जान, अथवा स्तुति से जितलाने वाले, 'तद्विविड्ढि=उस को कर। मनुष्य २ के यजन के लिये। दर्शनीय स्तोम को रुद्र के लिये।.४—) इन्द्र = अन्न को फाड़ता है(बीज को वर्षा से गीला करके फोड़कर उस के अंकुर निकालता है ) ( इरा०इ ) अथवा अन्न देता है ( वर्षा कर के ) ( इरा+दा ) अथवा अन्न को धारने वाला है ( इरा+धा ) वा अन्न को फाड़ता है ( इरा+दारि ) अथवा इरा को धारण करता है (इरा +धारि ) अथवा सोम ( पान ) के लिये झुकता है ( इन्दु+द्रु ) अथवा सोम में आनन्द मनाता है ( इन्दु+रम् ) अथवा प्राणियों को कान्ति वाला बनाता है ( अन्न देकर ) (इन्धः = इन्द्रः )'सो जो ( इन्द्रिय ) इस को प्राणों से प्रदीप्त करते भए, यह इन्द्र का इन्द्रत्व है' यह जाना जाता है, ( ब्राह्मण में)। इसके (=सब कुछ ) करने से इन्द्र ( इदं+करः ) यह आग्रयण मानता है,अथवा इस के देखने से ( इदं+दर्शः ) यह औपमन्यव। अथवा ऐश्वर्य अर्थ वाले इन्द्र ( भ्वा०प० ) से है। अथवा ऐश्वर्य वाला हुआ शत्रुओं को नष्ट करता है वा भगाता है,वा जिन्होंने यज्ञ किया है, उन का आदर करता है। उस की यह है ॥८॥

"अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्धधानाँ अरम्णाः। महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा

अव दानवं हन्"॥ अद्दणा उत्सम्। उत्स उत्सरणाद्धोत्सदनाद्धोत्स्यन्दनाद्धोनत्तेर्वा। व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतान्माध्यमिकान्त्संस्त्यायान्वावध्यमानानरम्णाः। रम्णातिः संयमनकर्मा विसर्जनकर्मा वा। महान्तमिन्द्र पर्वतं मेघं यद् व्यवृणोर्व्यसृजोऽस्य धारा अवहन्नेनं दानवं दानकर्माणम्। तस्यैषापरा भवति॥ ९॥

हे इन्द्र तूने मेघ को फाड़ा, और छेद बनाए, और (जल भार से) पीड़ित होते हुए मेघों से जल बहाया, इन्द्र जब तूने बड़े मेघ को खोला, तो धाराएं बहा दीं, और मेघ को मार गिराया (५।३२।१) फाड़दिया तूने मेघ को। 'उत्सः' ऊपर चलने से वा ऊपर रहने से वा ऊपर बहने से। अथवा गीला करने से (उन्दी क्लेदने)। बनाए इस के छेद, जल वाला (जल का मालिक) तू जल वाले इन माध्यमिक मेघ संघातों को (जल के भारसे) पीड़ि होते हुओं को। अरम्णाः = रम्णाति, संयम अर्थ वाला वा बहाने अर्थ वाला है। हे इन्द्र बड़े, पर्वत=मेघ को जब तूने खोला, तो इस की धाराएं बहाईं, मार गिराया, इस दानव = दाता को। उसकी यह और है॥९॥

"यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः"॥ यो जायमान एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्यभवत्पर्य्यगृह्

णात्पर्य्यरक्षदत्यक्रामदिति वा। यस्य बलाद् द्यावापृथि-
व्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स
जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसं-
युक्ता ॥ पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता ज-
न्यः, परो जेता वा, परो जनयिता वा, प्रार्जयिता वा
रसानाम् । तस्यैषा भवति ॥ १० ॥

"जो प्रकट होते ही मुखिया हुआ बड़े मन वाला है, देवता हुआ अपने कर्म से दूसरे देवताओं को दबालेता है (उलांघ जाता है) जिस के बल से द्यो और पृथिवी कांपते हैं, अपने बल की महिमा से युक्त है, हे जनो ! वह इन्द्र है (२।१२।१) जो प्रकट होते हो मुखिया दिलेर देवताओं को, क्रतुना = कर्म से। पर्यभूषत् = दबा लेता है, स्वीकार करता है, रक्षा करता है, वा उलांघ जाता है। जिसके बल से द्यावा पृथिवी भी डरते हैं, 'नृम्णस्य मन्हा' बल के महत्त्व से युक्त, हे जनो वह इन्द्र है। ऋषि, जिसने उस विषय को देखा है, उसकी प्रीति होती है, जब उसके साथ इति हास युक्त हो ॥ (९–) पर्जन्यः = आदि अन्त उलटे हुए तृप् (दि० प०) का है। तृप्त करने वाला और लोगों का हित कारी (तर्प् आद्यन्त उलट कर पर्त+जन्य=पर्ज्जन्य) अथवा श्रेष्ठ जीतने वाला वाला (पर+जयनः) अथवा श्रेष्ठ उत्पादक (पर+जन-यिता) अथवा रसों का कमाने वाला (प्रार्जयनः) उसकी यह है ॥ १० ॥

"वि वृक्षान्हन्त्युत हन्ति रक्षसो विश्वं बिभाय भु-

वनं महावधात् । उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः,, ॥ विहन्ति वृक्षान्विहन्ति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधान्महान्ह्यस्य वधः, अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः पापकृतः॥ बृहस्पतिर्बृहतः पाता वा पालयिता वा तस्यैषा भवति ॥

"वृक्षों को नष्ट करता है और राक्षसों को नष्ट करता है, इस बड़े मारने वाले (पर्जन्य) से सारा जगत डरता है। इस वर्षा वाले से निरपराधी भी भागता है, जब पर्जन्य गर्जता हुआ पापियों को मारता है" (५।८३।२) महावध=महान् इस का वध है। वृष्ण्यावतः=वर्षा के कर्मवाले से। (६–) बृहस्पतिः=बड़े का रक्षक, उस की यह है ॥११॥

"अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम्। निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य"॥ अशनवता मेघेनापिनद्धं मधु पर्यपश्यन्मत्स्यमिव दीन उदके निवसन्तम्। निर्जहार तच्चमसमिव वृक्षात्। चमसः कस्माच्चमन्त्यस्मिन्निति। बृहस्पतिर्विरवेण शब्देन विकृत्य॥ ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा। तस्यैषा भवति ॥ १२ ॥

बृहस्पति ने मेघ से ढके हुए जल को देखा, जैसे क्षीण जल में रहते हुए मत्स्य को (कोई देखे) और बड़ी गर्ज के

साथ हलचल में डाल कर उस को मेघ से निकाल लिया, जैसे वृक्ष से चमसा निकला जाता है ( १०।६८।८ ) व्याप्ति वाले=मेघ से ढके हुए जल को देखा, जैसे छोटे पानी में रहते हुए मत्स्य को । निकाला उसको चमस की न्याईं वृक्ष से। चमस, किस से=पीते हैं ( सोम ) इस में । वृहस्पति । विरवेण=शब्द से । हलचल में डाल कर (७) ब्रह्मणस्पति =ब्रह्म ( अन्न और मन्त्र ) का रक्षक,उस की यह है ॥१२॥

"अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् । तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम्" ॥ अशनवन्तमास्यन्दनवन्तमवातितं ब्रह्मणस्पतिर्मधुधारमभि यमोजसा बलेनाभ्यतृणत्तमेव सर्वे पिवन्ति रश्मयः सूर्यदृशो बह्वनं सह सिञ्चन्त्युत्समुद्रिणमुदकवन्तम् ॥ १३ ॥

व्याप्ति वाले और सेचने वाले, मीठी धारावाले, नीचे उतरे हुए जिस ( मेघ ) को ब्रह्मणस्पति ने बल से टुकड़े किया । इसी को सब सूर्य तुल्य दीखने वाली किरणें पी लेती हैं । (गर्मी में ) । ( बरसात में ) इकट्ठी मिल कर जल वाले उस मेघ को बहुत सेचन करती हैं ( २।२४।४)( अश्म ) व्याप्ति वाले ( आस्यं सेचने वाले । उद्रिणं= उदक वाले को ॥ १३ ॥

क्षेत्रस्य पतिः क्षेत्रं क्षियतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा । तस्यैषा भवति ॥ १४ ॥

(८) क्षेत्रस्य पतिः, क्षेत्र निवास अर्थ वाले क्षि (तु०प०) से है। उस का रक्षक है। उसकी यह है ॥ १४ ॥

"क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गामश्वं पोषयित्न्वा स नो मृळातीदृशे" ॥ क्षेत्रस्य पतिना वयं सुहितेनेव जयामो गामश्वं पुष्टं पोषयितृ चाहरेति। स नो मृळातीदृशे बलेन वा धनेन वा। मृळति-र्दानकर्मा। तस्यैषापरा भवति ॥ १५ ॥

"बड़े हिती की न्याई क्षेत्र के पति के साथ हम विजय पाते हैं। वह हमारे लिये पुष्टि करने वाला गौ घोड़ा (आदि धन) लावे, वह हमें ऐसे धन में सुखी करे (४।५७।१) क्षेत्रपति के साथ हम, बड़े हिती के साथ की न्याई जीतते हैं, वह गौ, घोड़ा और पुष्टि करने वाला लावे, 'वह हमें ऐसे में सुख करे' बल से वा धन से। मृळति दान अर्थ वाला वा पूजा अर्थ वाला है। उसकी यह और है ॥ १५ ॥

"क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु"॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयोऽस्मासु धुक्ष्वेति मधुश्चुतं घृतमिवोदकं सुपूतमृतस्य नः पातारो वा पालयितारो वा मृळयन्तु। मृळयति-रुपदयाकर्मा पूजाकर्मा वा ॥ तद्यत्समान्यामृचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकम्। मधु-

मन्तं मधुश्चुतमिति यथा॥ यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरम्। हिरण्यरूपः स हिरण्यसंदृगिति यथा॥ यथा कथा च विशेषोऽजामि भवतीत्यपरम्।"मण्डूका इवोदकान्मण्डूका उदकादिव"।इति यथा॥वास्तोष्पतिर्वास्तुवसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा। तस्यैषा भवति॥

"हे क्षेत्र के पति! धेनु जैसे दूध को, वैसे मधुरता से युक्त जल संघात को हमारे अन्दर वहा, जिस से मधु चू रहा हो, घृत की न्याईं अच्छा पुना हुआ हो, ऋत (यज्ञ वा जल) के रक्षक (देवता) हमारी रक्षा करें (वा हमारा आदर करें) (४।५७।२) मृळयति, रक्षा अर्थ वाला है, वा पूजा अर्थ वाला है॥ (अब मन्त्रों में पुनरुक्ति का विचार करते हैं) अब जो एक ही ऋचा में (एक पद के) समान अर्थ वाला पदान्तर होता है, वह पुनरुक्त होता है, जैसे (उक्त मन्त्र में) मधुमन्तं और मधुश्चुतं है (क्योंकि जिस से मधु चूता है वह अवश्य मधु वाला होता ही है) यह एक मत है॥ जो समान पाद में समान अर्थ वाला है, वही पुनरुक्त होता है जैसा कि यह है 'सुनहरी रूप वाला सोने के सदृश दीखने वाला' (२।३५।१०) * । यह दूसरा मत है। यथा कथञ्चित् (अत्यल्प भी) जो विशेष है, वही अपुनरुक्ति है. यह और मत है 'मेंडक जैसे जल से

* अर्थात् एक ही पाद में समानार्थक शब्द हों तब पुनरुक्ति होती है, पूर्व 'मधुमन्तं' मन्त्र के पूर्वार्ध में और मधुश्चुतं उत्तरार्ध में है, वहां पुनरुक्ति नहीं, वहां क्योंकि नई और विशेषता बतलाने के

( बोलते हैं ) मेंडक जल से जैसे, * ( १०।१८६।५ ) (९-) वास्तोष्पतिः, वास्तु निवास अर्थ वाले वस ( भ्वा०प ) का है, उसका रक्षक । उसकी यह है ॥१६॥

"अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः" ॥ अभ्यमनहा वास्तोष्पते सर्वाणि रूपाण्याविशन्सखा नः सुसुखो भव । शेव इति सुखनाम शिष्यतेर्वकारो नामकरणोऽन्तस्थान्तरोपलिङ्गी विभाषितगुणः शिवमित्यप्यस्य भवति । यद्यद्रूपं कामयते तत्तद् देवता भवति । "रूपंरूपं मघवा बोभवीति"इत्यपि निगमो भवति॥वाचस्पतिर्वाचः पाता वा पालयिता वा । तस्यैषा भवति॥१७॥

हे वास्तोष्पते ( घर के मालिक ) सारे रूपों में आवेश करता हुआ † तू रोगों का नाशक हो, और उत्तम सुखकारी

लिये कही बात की फिर स्मृति कराई है*यहां एकत्र 'मेंडक'उपमान है, अन्यत्र जल उपमान है, इतनी मात्र विशेषता से जैसे यहां पुनरुक्ति नहीं, वैसे सर्वत्र कोई न कोई विशेषता पाई जाती है, जैसे कोई मधुमान् तो होता है, पर उस से मधु चूता नहीं रहता, इस लिये मधुमन्तं के साथ मधुश्चुतं अलग विशेषण दिया, इसी प्रकार कोई सुनहरी रंग का होकर भी सोने का सा दीखता नहीं, अर्थात् वैसा प्यारा नहीं लगता इस लिये हिरण्यरूपः के साथ हिरण्य संदृक् अलग दिया है ॥

† रूपों में आवेश करता हुआ, हर एक रोग की औषध में आवेश करके रोगों को दूर कर, और हर उपयुक्त वस्तु में आवेश कर के हमें पूरा २ सुखप्रद हो ।

हमारा सखा बन ( ७।८९।१ ) 'शेव' यह सुख का नाम है, शिष् ( दि० प० ) से । व प्रत्यय है जो ( धातु के ) अन्त में स्थित ( ष् ) के स्थान में आता है ( शिष्+व = शिव ) विकल्प करके गुण होता है ( गुण होकर शेव, और न गुण होकर ) शिव भी इसी का है। *जिस २ रूप को चाहता है, वही २ रूप देवता हो जाता है। 'धनवान् ( इन्द्र ) रूप रूप ( हर एक रूप ) फिर २ होता है ( ३।५३।८ ) यह भी निगम होता है। ( १०-- ) वाचस्पतिः = वाणी का रक्षक, उस की यह है ॥ १७ ॥

'पुनरेहि वाचस्पते देवेन मनसा सह। वसोष्पते नि रामय मय्येव तन्वं मम' ॥ इति सा निगदव्याख्याता॥ अपां नपात्तनूनप्त्रा व्याख्यातः। तस्यैषा भवति॥१८

हे वाचस्पते फिर मन देव के साथ आ, हे धन के स्वामी मुझे निरन्तर रमण करा, मुझ में ही मेरा शरीर हो ( अर्थात् विकाराधीन न हो ) ( अथर्व १।१।२ ) यह पाठ से ही व्याख्यात है। ( ११-- ) अपां नपात्, तनूनपात् से व्याख्या किया गया † । उस की यह है ॥ १८ ॥

"यो अनिध्मो दीदयदप्स्वन्तर्यं विप्रास ईळते अध्वरेषु । अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय"॥ योऽनिध्मो दीदयद् दीप्यसेऽभ्यन्तर

* 'सारे रूपों में आवेश करता हुआ' जो कहा है, ऐसा देवता का सामर्थ्य होता है, यह दिखलाते हैं।

† अपांनपात् = जलों का पोता ( जलों से आदित्य, आदित्य से मध्यम, इस प्रकार मध्यम जलों का पोता है—दुर्गाचार्य )।

मप्सु यं मेधाविनः स्तुवन्ति यज्ञेषु सोऽपां नपान्मधुमतीरपो देह्यभिषवाय याभिरिन्द्रो वर्धते वीर्याय वीरकर्मणे ॥ यमो यच्छतीति सतः । तस्यैषा भवति॥१९॥

"जो बिना इन्धन के जलों में चमकता है, जिस की बुद्धिमान् यज्ञों में स्तुति करते हैं । सो तू हे अपांनपात् मधुर रस वाले जल हमें दे, जिन से इन्द्र वीर कर्म के लिये बढ़ता है (१०।३०।४) जो तू इन्धन के बिना, दीदीयत् = चमकता है, जलों के अन्दर । जिसकी बुद्धिमान् स्तुति करते हैं यज्ञों में । वह तू हे अपांनपात् मधुर रस वाले जल हमें दे सोम निकालने के लिये * । जिन से इन्द्र बढ़ता है । वीर्याय = वीर कर्म के लिये । (१२-- ) यम नियम में रखता है ( सब को ) ऐसा होते हुए से । उस की यह है ॥ १९ ॥

" परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् । वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य" ॥ परेयिवांसं पर्यागतवन्तं प्रवत उद्वतो निवत इत्यवतिर्गतिकर्मा, बहुभ्यः पन्थानमनुपस्पाशयमानम् । वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्येति । दुवस्यती राध्नोतिकर्मा॥ अग्निरपि यम उच्यते । तमेता ऋचोऽनुप्रवदन्ति ।२०

जो सब श्रेष्ठों को और सारी भूमियों को घेरे हुए है, सब के लिये मार्ग दिखला रहा है; जिस के पास सब लोग इकट्ठे होते

* बसती वरी जल सोम में मिलाए जाते हैं ।

हैं, उस वैवस्वत ( सूर्यपुत्र ) यमराजा को हवि से सेवाकर ।१०।१४।१ ) । परेयिवांसं=घेर कर स्थित को । प्रवतः, उद्वतः, निवतः की न्याई (उपसर्ग से वत् प्रत्यय) है । अथवा अव(भ्वा०प) गति अर्थ वाला है (उन का प्रपूर्वक प्रवतः है )। सब के लिये मार्ग दिखलाते हुए सूर्यपुत्र यमराजा को, जिस के पास सब लोग इकट्ठे होते हैं, हवि से सेवन कर । दुवस्यति सेवा अर्थ वाला है । अग्नि भी यम कहलाता है, उस को यह ऋचाएं बतलाती हैं ॥२०॥

"सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका"॥ "यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्" ॥ "तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम्" । इति द्विपदाः । सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत्त्वेषप्रतीका भयप्रतीका बलप्रतीका यशःप्रतीका महाप्रतीका दीप्तप्रतीका वा॥ 'यमो ह जातः,इन्द्रेण सह सङ्गतः । 'यमाविहेहमातरा' इत्यपि निगमो भवति॥यम इव जातो यमो जनिष्यमाणो जारः कनीनां जरयिता कन्यानां पतिर्जनीनां पालयिता जायानाम् । तत्प्रधाना हि यज्ञसंयोगेन भवन्ति ।"तृतीयो अग्निष्टे पतिः"इत्यपि निगमो भवति ॥ तं वश्चराथा चरन्त्या पश्वाहुत्या वसत्या च निवसन्त्यौषधाहुत्यास्तं यथा गाव आप्नुवन्ति तथाप्नुयामेद्धं समृद्धं भोगैः ॥ मित्रः प्रमी-

तेश्नायतेः सम्भिन्वानो द्रवतीति वा भेदयतेर्वा। तस्यैषा भवति ॥२१॥

(सेनानी से) प्रेरी हुई सेना की न्याई (यह अग्नि)भय देता है (शत्रुओं को) (वा बल देता है अपनों को) फेंकने वाले के चमकते मुख वाले वज्र की न्याई ( भय देता है ) ।७। यम ( आहुतियों का नियन्ता अग्नि ) है जो कुछ उत्पन्न हुआ है, यम ( अग्नि ) है जो उत्पन्न होगा ( अग्नि के अधीन सब की उत्पत्ति है )। कन्याओं का जीर्ण करने वाला ( क्योंकि विवाह के समय अग्नि में लाजा होमादि करने से कन्याओं का कन्यात्व निवृत्त होता है) और पालक है विवाहिताओं का ( अग्न्यधीन सारे गृह्य श्रौत कर्म होने से ) ।८। उस प्रदीप्त हुए को हम जंगम और स्थावर (आहुति) से व्याप्त होते हैं, जैसे गौएं घर को।९।(१।६६।७-९) यह दो २ पाद की ( तीन ) ऋचाएं हैं ॥ प्रेरी हुई सेना की न्याई भय वा बल देता है। फेंकने वाले के वज्र की न्याई, त्वेष प्रतीका=भयानक मुख वाली, बल वाले मुख वाली, यशस्वी मुख वाली, वा बड़े मुख वाली वा चमकते मुखवाली ।* जोड़ा उत्पन्न हुआ, क्योंकि इन्द्र के साथ संगत हुआ उत्पन्न हुआ। जैसा कि यह निगम भी है '(हे इन्द्राग्नी ) तुम दोनों जोड़े( भाई) हो, यहां यहां ( अर्थात् सर्वत्र ) तुम्हारी माता ( अदिति ) है ( ६।५९।२ ) ( सो जोड़ा होने से अग्नि को यम कहा है ) जोड़ा सा उत्पन्न हुआ, जोड़ा उत्पन्न होगा । 'जारः कनीनां'=जीर्ण करने वाला है कन्याओं का 'पतिर्जनीनां'=पालने वाला है

* यमोह जातः का अर्थ ।

स्त्रियों का, क्योंकि यज्ञ के सम्बध से स्त्रियें अग्नि प्रधान होती हैं। निगम भी है 'तीसरा तेरा अग्नि पति है' (१०।८५।४०) † उम को, चरथा=चलती हुई से=पशुआहुति से। वसत्या=निवास करती हुई से=ओषधियों की आहुति से। घर को जैसे गौएं प्राप्त होती हैं, वैसे प्राप्त हों। इद्धं=प्रदीप्त को, भोगों से। (१३-) मित्र, मरने से बचाता है (मी, दि०आ०+त्र,भ्वा०आ) अथवा चारों ओर से मिनता हुआ बहता है (जल के द्वारा अन्तरिक्ष में) (मि+द्रु) अथवा मेदयति से (सब को जल से स्निग्ध करता है) उस की यह है ॥२१॥

"मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोत" ॥ मित्रो जनानायातयति ब्रुवाणः शब्दं कुर्वन्मित्र एव धारयति पृथिवीं च दिवं च । मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति ॥ कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा । मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातम् । जुहोतिर्दानकर्मा ॥ कः कमनो वा क्रमणो वा सुखो वा । तस्यैषा भवति ॥२२॥

मित्र (मेघ द्वारा) शब्द करता हुआ लोगों को काम में लगाता है, मित्र द्यो और पृथिवी को धारण करता है, मित्र मनुष्यों को विना आंख झपकने के (अर्थात् लगातार अनुग्रह दृष्टि से) देखता

† 'तंचरश्चराथा' का नैरुक्त अर्थ।

है, मित्र के लिये घृतयुक्त हव्य होमो ( ३।५९।१ )। 'कृष्टयः' मनुष्यों का नाम है, कर्म वाले होते हैं। अथवा फैले शरीरों वाले होते हैं ( पशु अपने अंगों को अपनी इच्छा से फैला नहीं सकते, मनुष्य यथेष्ट फैला सकते हैं.) 'मित्राय हव्यं घृतवज्जुहोत' यह व्याख्या किया गया। जुहोति,दान अर्थ वाला है। (१४-)कः= प्यारा वा कमण करने वाला, वा सुख स्वरूप। उस की यह है॥

"हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम" ॥ हिरण्यगर्भो हिरण्यमयो गर्भो हिरण्यमयो गर्भोऽस्येति वा। गर्भो गृभेर्गृणात्यर्थे गिरत्यनर्थानिति वा। यदा हि स्त्री गुणान्गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति। समभवदग्रे भूतस्य जातः पतिरेको बभूव। स धारयति पृथिवीं च दिवं च। कस्मै देवाय हविषा विधेमेति व्याख्यातम्। विधतिर्दानकर्मा ॥ सरस्वान्व्याख्यातः। तस्यैषा भवति ॥ २३ ॥

हिरण्यगर्भ पहले प्रकट हुआ, जो प्रकट होते ही सब भूतों का एक पति ( रक्षक ) है। वह धारण करता है अन्तरिक्ष द्यौ और इस ( भूमि ) को, उस सुखस्वरूप देव के लिये हम हवि दें ( १०।१२१।१ ) हिरण्यगर्भः=सुनहरी गर्भ=विज्ञानमय गर्भ, अथवा सुनहरी गर्भ है इस का। गर्भ, स्तुति अर्थ वाले गृभ् से है ( गर्भ, स्तुति के योग्य होता है ) अथवा अनर्थों को निगलता है

( नाश ) करता है । जब स्त्री ( =स्त्री-का रक्त ) गुणों ( वीर्य ) को ग्रहण करती है, और इस ( स्त्री ) के गुण (रक्त) ग्रहण किये जाते हैं ( वीर्य से ), तब गर्भ होता है । प्रकट होते ही भुवन मात्र का एक पति था । वह धारण करता है पृथिवी और द्यौ को । उस सुख स्वरूप देव के लिये हवि दें, यह व्याख्या किया गया है । विधति,दान अर्थ वाला है । (१५-) सरस्वान् व्याख्या किया गया है ।(सरस्वती शब्द से ) उस की यह है ॥

"ये ते सरस्वन्नूर्मयो मधुमन्तो घृतश्चुतः । तेभिर्नोऽविता भव"॥ इति सा निगदव्याख्याता॥२४॥

हे सरस्वन् ! जो तेरे तरंग ( मेघ ) मधुवाले ( मधुर जल वाले ) और जल के झरने वाले हैं, उन से हमारा रक्षक हो (७।९६।५) यह पाठ से ही व्याख्या की गई है।२४।

विश्वकर्मा सर्वस्य कर्त्ता । तस्यैषा भवति ॥२५॥

(१६-)विश्व कर्मा=सब का बनाने वाला । उस की यह है ॥२५॥

"विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक् । तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः" ॥ विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्द्रष्टा भूतानां । तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वाद्भिः सह सम्मोदन्ते यत्रैतानि सप्तऋषीणानि ज्योतींषि तेभ्यः पर आदित्य-

स्तान्येतस्मिन्नेकं भवन्तीत्यधिदैवतम् ॥ अथाध्यात्मं विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्दर्शयितेन्द्रियाणामेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वान्नेन सह सम्मोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः पर आत्मा तान्येतस्मिन्नेकं भवन्तीत्यात्मगतिमाचष्टे । तत्रेतिहासमाचक्षते–विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार स आत्मानमप्यन्ततो जुहवाञ्चकार । तदभिवादिन्येषर्ग्भवति । य इमा विश्वा भुवनानि जुह्वदिति । तस्योत्तरा भूयसे निर्वचनाय ॥ २६ ॥

सब का कर्ता, बड़े मन वाला, महान्, उत्पन्न करने वाला, विधाता, ( जीवन दाता, वा विधान करने वाला ) श्रेष्ठ, सबका द्रष्टा (आदित्य वा परमात्मा) है । उन के इष्ट (कार्य) जलते वा अन्न से फलते फूलते हैं, जहां सात ऋषियों (किरणों वा इन्द्रियों) से परे एक ( आदित्य वा आत्मा ) बतलाते हैं ( १०।८२।२ ) (आधिदैवत और अध्यात्म भेद से इस मन्त्र के दो अर्थ हैं पहला आधिदैवत) सब का कर्ता, बड़े मन वाला, व्यापने वाला, उत्पन्न करने वाला, (जीवन का) देने वाला, उत्तम, सब भूतों का द्रष्टा । उन के इष्ट=प्यारे, वा प्राप्त वा अभिमत वा झुके हुए (कार्य) जलों के साथ फलते फूलते हैं । जहां इन सात ऋषि=प्रकाशक (किरणों)

से परे आदित्य है, वह उस में एक होते हैं। यह अधिदैवत है।। अब अध्यात्म कहते हैं। सब का कर्ता बड़े मन वाला, उत्कृष्ट और दिखलाने वाला इन्द्रियों का। इन के इष्ट=प्यारे, प्राप्त, अभिमत वा झुके हुए अन्न के साथ तृप्त होते हैं, जहां यह सात ऋषि इन्द्रिय हैं इन से परे आत्मा, वह इन में एक होते हैं, इस प्रकार आत्मगति को कहता है। इस में इतिहास कहते हैं। भौवन विश्वकर्मा ने सर्वमेध (यज्ञ) में सब भूतों को होम दिया, उस ने अन्ततः अपने आप को भी होम दिया। इस (विषय)के कहने वाली यह ऋचा है "जो इन सारे भुवनों को होमता हुआ" (१०।८१।१) उस की अगली ऋचा अधिकतर खोलने के लिए है।२६।

"विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु" ॥ विश्वकर्म्मन्हविषा वर्धयमानः स्वयं यजस्व पृथिवीं च दिवं च मुह्यन्त्वन्ये अभितो जनाः सपत्ना इहास्माकं मघवा सूरिरस्तु प्रज्ञाता ॥ तार्क्ष्यस्त्वष्टा व्याख्यातः। तीर्णेऽन्तरिक्षे क्षियति तूर्णमर्थं रक्षत्यश्नोतेर्वा। तस्यैषा भवति ॥ २७ ॥

* भौवन=भुवन पुत्र (दुर्गाचार्य) यहां जैसा कि सूक्त मन्त्रों से स्पष्ट है अपने शिल्प कौशल द्वारा भुवन से प्रकट होता हुआ विश्व कर्मा परमात्मा है। जैसा कि शतपथ में इस को स्पष्ट किया है "ब्रह्मा स्वयम्भू ने तप तपा, उस ने देखा, तप की अनन्तता नहीं है, हन्त मैं अपने आप को भूतों में होम दूं और भूतों को अपने आप में" इत्यादि। यह सर्वमेध परमात्मा की सब में स्थिति और परमात्मा में सब की स्थिति बोधन करता है॥

हे विश्वकर्मन् ! हविसे बढ़ाता हुआ तू स्वयं पृथिवी और द्यौ को यजन कर। चारों ओर जो और जन हैं ( तेरी उपासना से पराङ्मुख) वह हैरान हों। धनवान्, प्रज्ञावान् ( विश्वकर्मा ) यहां हमारा हो ( हम पर अनुग्रह दृष्टि हो–१०।८१।६) हे विश्व कर्मन्। हविसे बढ़ाता हुआ तू स्वयं यजन कर पृथिवी और द्यौ को। हैरान हों दूसरे चारों ओर जन=शत्रु,यहां हमारा हो धन-वान्। सूरि=प्रज्ञाता। (२७-) तार्क्ष्यः, त्वष्टा से व्याख्या किया गया है (८।१४) सर्वतोगतः=अन्तरिक्ष में निवास करता है (तृ+क्षिसे) अथवा जल्दी, अर्थ [=जल] की रक्षा करता है [तूर्ण +रक्ष] अथवा [उत्तरपद में] अश् [स्वा० आ०] से [-तूर्णमश्नुते, तूर्ण+अश् से]। उस की यह है।२७।

"त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम्। अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम"॥ तं भृशमन्नवन्तं।जूतिर्गतिः प्रीतिर्वा देवजूतं देवगतं देवप्रीतं वा। सहस्वन्तं तारयितारं रथानामरिष्टनेमिं पृतनाजितमाशुं स्वस्तये तार्क्ष्यमिह ह्वयेमेति। कमन्यं मध्यमाद्देवमवक्ष्यत्। तस्यैषापरा भवति॥२८॥

उस अन्न वाले देवताओं से प्रेरे हुए (सोमलाने के लिए, वा देवताओं से प्यार किए हुए ] बलवाले [ वा दबाने वाले ] रथों [गतिशील मेघ को] पहुंचानेवाले,न रुकने वाले वज्र वाले, संग्रामों के जीतने वाले शीघ्र चलने वाले तार्क्ष्य को हम यहां कल्याण के लिये बुलावें [१०।१७८।१४; साम, छ० आ० ९।१।१] उस बहुत अन्न वाले। जूति=गति वा प्रीति। सो देवजूत=देवताओं प्रेरे

हुए वा देवताओं से प्यार किए हुए। बलवान् रथों के तारने वाले अपरिहत रथ वाले, सेनाओं के जीतने वाले, जल्दी चलने वाले तार्क्ष्य को यहां हम कल्याण के लिए बुलावें। मध्यम से भिन्न किस को ऐसे [बलवाला, वज्रवाला, सेनाओं को जीतने वाला] कहता [इस से तार्क्ष्य मध्यम है] उस की यह और है [जिस में वर्षा करना भी उस का मध्यम लिंग पाया जाता है] ।२८।

"सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्त युवतिं न शर्याम्" ॥ सद्योपि यः शवसा बलेन तनोत्यपः सूर्य इव ज्योतिषा पंच मनुष्यजातानि सहस्रसानिनी शतसानिन्यस्य सा गतिर्न स्मैनां वारयन्ति प्रयुवतीमिव शरमयीमिषुम् ॥ मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा मन्यन्त्यस्मादिषवः। तस्यैषा भवति ॥ २९ ॥

जल्दी ही जो ( तार्क्ष्य ) पांच प्रकार के मनुष्यों के प्रति जल फैलाता है, जैसे सूर्य ज्योति से ( फैलता है ) सहस्रों और सैकड़ों(दान) देने वाला है इसका वेग, (उसे कोई भी) रोक नहीं सकते हैं, जैसे ( अपने आप को लक्ष्य के साथ ) मिलाते हुए शरमय (बाण के वेग) को (रोक नहीं सकते हैं) (१०।१७८।३) जल्दी ही जो शवसा=बल से। फैलाता है जलों को सूर्य जैसे ज्योति से। पांच मनुष्यप्रकारों(चारवर्ण पांचवां वर्ण संकर)के प्रति। सहस्रों सैकड़ों के देने वाली वह इस की गति है। नहीं इसको

रोकते हैं, ( अपने आप को ) मिलाता हुआ जैसे शरमय बाण (१८–) मन्युः, दीप्ति अर्थ वाले वा क्रोध अर्थ वाले वा वध अर्थ वाले मन्य से । चमकते हैं इस से बाण । उस की यह है ॥२९॥

"त्वया मन्यो सरथमारुजन्तो हर्षमाणासोऽधृषिता मरुत्वः । तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरोअग्निरूपाः" ॥ त्वया मन्यो सरथमारुह्य रुजन्तो हर्षमाणासोऽधृषिता मरुत्वस्तिग्मेषव आयुधानि संशिश्यमाना अभिप्रयन्तु नरो अग्निरूपा अग्निकर्माणः सन्नद्धा कवचिन इति वा ॥ दधिक्रा व्याख्यातः । तस्यैषा भवति ॥३०॥

हे मन्यो ! हे मरुतों वाले [ मरुत् जिस के साथी हैं ] तेरे साथ एक रथ पर चढ़ कर [ शत्रुओं को ] तोड़ते हुए, हर्ष मनाते हुए, किसी से न दबे हुए, तीक्ष्ण बाणों वाले शस्त्रों को तीक्ष्ण करते हुए, अग्निरूप हमारे योद्धा [ शत्रुओं पर ] चढ़ें [ १०। ८४।२ अथर्व ४।३१ ] अग्निरूपाः=अग्नितुल्य प्रचण्ड कर्मों वाले, अथवा तय्यार, कवच पहने हुए [कवचों से चमकते हुए] ।[शत्रुओं को जीतने के कर्म और मरुतों के साथ कहने से मन्यु मध्यम है ] । [१९– ] दधिक्राः, व्याख्या किया गया है [ २। २७ ] उस की यह है ॥ ३० ॥

"आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा

समिमा वचांसि" ॥ आतनोति दधिक्राः शवसा वलेनापः सूर्य्य इव ज्योतिषा पंच मनुष्यजातानि सहस्रसाः शतसा वाजी वेजनवानर्वैरणवान्त्सम्पृणक्तु नो मधुनोदकेन वचनानीमानीति । मधु धमतेर्विपरीतस्य ॥ सविता सर्वस्य प्रसविता । तस्यैषा वाति ॥ ३१ ॥

"दधिक्रा बल से पांच मनुष्यों के प्रति सूर्य की न्याई ज्योति से जल फैलता है, सहस्रों सैकड़ों के देने वाला, कंपाने वाला, धकेलने वाला ( वा, गति वाला ) वह इन वचनों को जल से संयुक्त करे [ स्तुति के अनन्तर वरसे ] * [ ४।३९।१० ] वाजी=कंपाने वाला, अर्वा=धकेलने वाला । मधु उलटा हुए धमति [ध्मा,भ्वा०प०] से है [ धमु होकर मधु हुआ है ] [२०–] सविता=सब का प्रेरक, उस की यह है ॥३१॥

"सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् । अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम्"॥ सविता यन्त्रैः पृथिवीमरमयदनारम्भणेऽन्तरिक्षे सविता द्यामदृंहदश्वमिवाधुक्षद्धुनिमन्तरिक्षे मेघं बद्धमतूर्ते बद्धमतूर्ण इति वा त्वरमाण इति वा, सविता समुदितारमिति । कमन्यं मध्यमादेवमवक्ष्यत् । आदित्योऽपि सवितोच्यते । तथा च

* यल कर्म और वर्षा कर्म दोनो हैं, इस से मध्यम है ॥

हैरण्यस्तूपस्तुतोऽर्चन्हिरण्यस्तूपऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग्भवति ॥३२॥

"सविता यन्त्रों [ वृष्टिदानादि उपायों से ] पृथिवी को रमण कराता है, सविता ने बिना सहारे के द्यौ को दृढ़ किया है, सविता घोड़े की न्याईं झाड़ने वाले [ किसी से ] पीड़ा न दिये हुए [ वा, अचल ) अन्तरिक्ष में बन्धे हुए समुद्र [मेघ] को दोहता है [१०।१४९।१] सविता यन्त्रों से पृथिवी को रमण कराता है बिना सहारे आकाश में सविता ने द्यौ को दृढ किया है। घोड़े की न्याईं झाड़ने वाले ( जैसे घोड़ा शरीर से धूल झाड़ता है इस प्रकार मेघ जल झाड़ता है ] अन्तरिक्ष में बन्धे हुए मेघ को दोहता है। अतूर्ते=पीड़ा न दिये हुए में, वा अचल में। सविता। समुद्र=भलि भांति गीला करने वाले [मेघ] को। मध्यम से भिन्न और किस को ऐसे [मेघ का दोहने वाला] कह सकता,[इस लिए यहां सविता मध्यम है] सूर्य भी सविता कहलाता है। जैसा कि हैरण्यस्तूप [ सूक्त ] में स्तुति किया गया है। अर्चन नामी हिरण्यस्तूप ऋषि ने इस सूक्त का प्रवचन किया है। उस के कहने वाली यह ऋचा है।३२।

"हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन्। एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम्" ॥ हिरण्यस्तूपो हिरण्मयः स्तूपो हिरण्मयः स्तूपोऽस्येति वा। स्तूपः स्त्यायतेः संघातः। सवितर्यथा त्वाङ्गिरसो जुह्वे वाजेऽन्नेऽस्मिन्नेवं

त्वार्चन्नवनाय वन्दमानः सोमस्येवांशुं प्रतिजागर्म्य-हम् ॥ त्वष्टा व्याख्यातः । तस्यैषा भवति ॥२३॥

हे सवितः! आंगिरस (आंगिरस् का पुत्र) हिरण्यस्तूप जैसे तुझे इस अन्न ( हवि ) में बुलाता है, वैसे मैं अर्चन् रक्षा के लिए स्तुति करता हुआ जागता हूं ( सावधान होकर स्थित हूं ) जैसे (यजमान) सोम के अंशु के लिए ( जागता है १०।१९१।९) हिरण्यस्तूप=सुनहरी लाट(वा,ढेर) अथवा सुनहरी लाट है इसकी। स्तूप, स्त्ये ( भ्वा०प०) से है। अर्थात् संघात ( ढेरवालाट ) है हे सवितः! जैसे तुझे आंगिरस बुलाता है इस, वाजे = अन्न में। ऐसे तुझे अर्चन् रक्षा के लिए वन्दना करता हुआ। सोम के अंशु की न्याई (तेरे लिए) जागता हूं मैं (२१–) त्वष्टा व्याख्या किया गया है (८।१४ में) उस की यह है।२३।

"देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान। इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम्"॥ देवस्त्वष्टा सविता सर्वरूपः पोषति प्रजा रसानुप्रदानेन बहुधा चेमा जनयतीमानि च सर्वाणि भूतान्युदकान्यस्य महच्चास्मै देवानामसुरत्वमेकं प्रज्ञावत्त्वं वानवत्त्वं वापि वासुरिति प्रज्ञानामास्यत्यनर्थानस्ताश्चास्यामर्था असुरत्वमादिलुप्तम् ॥ वातो वातीति सतः। तस्यैषा भवति ॥ २४ ॥

"उत्पन्न करने वाला, सारे रूपों वाला त्वष्टा देव प्रजाओं को बहु प्रकार से उत्पन्न करता है और पोषण करता है

यह सब जल इस के हैं, देवताओं में से इस के लिए यह एक प्रज्ञावत्ता, वा प्रबलता (बड़ा ऐश्वर्य है) (३।५५।१९) देव त्वष्टा उत्पादक, सब रूपों वाला, पुष्ट करता है प्रजाओं को जल देने से और बहु प्रकार से इन (प्रजाओं) को उत्पन्न करता है, यह सब भुवन = जल, इस के हैं, बड़ा है इस के लिये देवताओं में से मुख्य, असुरत्व = प्रज्ञावत्ता वा प्राणवत्ता (बलवत्ता) (असुका अर्थ प्राण तो प्रसिद्ध है) अथवा असु, प्रज्ञा का नाम है अनर्थों को परे फेंकती है, वा फेंके हुए (डाले हुए) होते हैं इस में अर्थ। अथवा असुरत्वं, आदि लुप्त है (आदिका व लुप्त है) असुरत्वं =वसुरत्वं = धन दाता होना। यह जल रूप धन दाता है (२२-) वातः=बहता है, ऐसा होते हुए से। उस की यह है।३४।

"वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्रण आयूंषि तारिषत्" ॥ वात आवातु भैषज्यानि शम्भु मयोभु च नो हृदयाय प्रवर्धयतु च न आयुः॥ अग्निर्व्याख्यातः। तस्यैषापरा भवति ॥ ३५ ॥

वायु हमारे लिये औषध रूप हुआ बहता आवे कल्याण कारी (रोगनाशक) हुआ और हमारे हृदय के लिये सुख कारी हुआ (बहता आवे) हमारी आयुओं को बढावे (१०। १८६।१)(२३-) अग्नि व्याख्या किया गया है (७।१४में) उस की यह है।३५।

"प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि" ॥ तं प्रति चारुमध्वरं सोमपानाय

प्रहूयसे, सोऽग्ने मरुद्भिः सहागच्छेति । कमन्यं मध्यमादेवमवक्ष्यत् । तस्यैषापरा भवति ॥ ३६ ॥

उस सुहावने (अंगों की विकलता से रहित) यज्ञ के प्रति तू सोम पीने के लिये (हमसे) बुलाया जाता है हे अग्ने मरुतों समेत आ(१।१९।१) मध्यम से भिन्न और किस को ऐसे (सोम पीने के लिए और मरुतों के साथ आ) कहता, इस लिए यह अग्नि मध्यम विद्युत है उस की यह और है ।३६।

"अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आ गहि" ॥ अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति ॥ ३७ ॥

हे अग्ने पहले पीने के लिए तेरे लिये सोममय मधु ( सोम स्वरूप शहद)तय्यार करता हूं, मरुतों के साथ आ(१।१९।९)।२४।

वेनो वेनतेः कान्तिकर्मणः । तस्यैषा भवति ।३८

वेन, कान्ति अर्थ वाले वेन (भा० उ०)से है ( मध्यम सब लोक का प्यारा है क्योंकि वर्षा द्वारा सब का उपकारी होता है) उस की यह है ।३७।

"अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपां सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति"॥ अयं वेनश्चोदयत्पृश्निगर्भाः प्राष्टवर्णगर्भा आपः इति वा ज्योतिर्जरायुर्ज्योतिरस्य

जरायुस्थानीयं भवति । जरायु जरया गर्भस्य जरया यूयत इति वा । इममपां च सङ्गमने सूर्यस्य च शिशुमिव विप्रा मतिभी रिहन्ति लिहन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति वा । शिशुः शंसनीयो भवति शिशीतेर्वा स्याद् दानकर्मणश्चिरलब्धो गर्भो भवति॥ असुनीतिरसून्नयति । तस्यैषा भवति ॥ ३९ ॥

यह वेन (प्यारा) जल के बनाने वाले (अन्तरिक्ष) में स्थित हुआ इन जलों को (पृथिवी की ओर) प्रेरता है, जो सूर्य (की रश्मियों के) गर्भभूत हैं और ज्योति (विद्युत्) जिन का जरायु (जेर) है, जलों को और सूर्य (सूर्यरश्मियों) के मेल के स्थान (अन्तरिक्ष) में वर्तमान इस को बुद्धिमान् अपनी बुद्धियों से स्तुति करते हैं, जैसे (माता पिता बच्चे की) स्तुति करते हैं।१०।१२३।१. यजु ७।१६) यह वेन प्रेरता है, पृश्निगर्भाः = अच्छे पाण्वर्ण वाले (सूर्य वा रश्मियों) के गर्भ भूत जल । ज्योति जरायु = ज्योति इस की जेर स्थानी होता है । जरायु । गर्भ की जरा के साथ होती है (गर्भ बाहर आने के पीछे जो गिरती है उस का नाम जरा है) अथवा जरा के साथ मिलती है । इस को जलों के और सूर्य के संगम स्थान में शिशु की न्याई बुद्धिमान् मतियों से । रिहन्ति लिहन्ति = स्तुति करते हैं वा बढ़ाते हैं, वा पूजते हैं । शिशुः = प्रशंसनीय होता है अथवा दान अर्थ वाले शिशीति से है (पुरुष से स्त्री को दिया जाता है धारने के लिए) चिर से पाया हुआ जल (रश्मियों का) गर्भ होता है । [२५—] असुनीति = प्राणों को ले जाता है [लोक से परलोक में] उस की यह है ।३९।

"असुनीते मनो अस्मासु धारय जीवातवे सु-प्रतिरा न आयुः ॥ रारन्धि नः सूर्यस्य सन्दृशि घृतेन त्वं तन्वं वर्धयस्व" ॥ असुनीते मनोऽस्मासु धारय चिरं जीवनाय प्रवर्धय च न आयू रन्धय च नः सूर्यस्य सन्दर्शनाय । रध्यतिर्वशगमनेऽपि दृश्यते-'मा रधाम द्विषते सोम राजन्' इत्यपि निगमो भवति । घृतेन त्वमात्मानं तन्वं वर्धयस्व ॥ ऋतो व्याख्यातः । तस्यैषा भवति ॥४०॥

हे असुनीते ! हम में मन को धारण कर, चिर जीने के लिए हमारी आयु को बढ़ा, और हमें सफलता दे सूर्य के भले भांति देखने के लिये । जल से तू अपने शरीर को बढ़ा [१०।५९।५] रध्यति वश पड़ने में भी दीखता है । जैसे यह निगम है, हे सोमराजन् ! हम शत्रु के वश [कभी] न पड़ें (१०।१२८।५) घृत से तू । तन्वं=अपने आप को बढ़ा । [ २६— ] ऋत व्याख्या किया गया है [ २।२५ में ] उस की यह है ।४०।

"ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति । ऋतस्य श्लोको बधिराततर्द कर्णा बुधानः शुचमान आयोः" ॥ ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य प्रज्ञा वर्जनीयानि हन्त्यृतस्य श्लोको बधिरस्यापि कर्णावातृणत्ति । बधिरो बद्धश्रोत्रः। कर्णौ बोधयन्दीप्यमानश्चायोरयनस्य मनुष्यस्य ज्योति-

षो वोदकस्य वा ॥ इन्दुरिन्धेरुनत्तेर्वा । तस्यैषा भवति॥

ऋत [मध्यम देव] के पहले से संचित जल हैं, ऋत की प्रज्ञा पापों का नाश करती है (ऋत की अनुग्रह बुद्धि से वह पाप मिट जाते हैं जो अकाल के कारण उत्पन्न होते हैं ) ऋत को जागती हुई और चमकती हुई ध्वनि मनुष्य के बहरे कानों को खोल देती है (४।२३।८) बधिरः=बन्द कानों वाला। कानों की जगाती हुई और चमकती हुई [ध्वनि] । आयोः = गति शील मनुष्य के वा ज्योति के वा जल के। [१७- ] इन्दु इन्ध [रु० आ ] से [ चमकता है ] अथवा उन्द [ रु०उ० ] से है [ गीला करता है ओस से ] उस की यह है।४१।

"प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति । स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् । अव स्रवेदघशंसोऽवतर मव क्षुद्रमिव स्रवेत्" ॥ प्रब्रवीमि तद्भव्यायेन्दवे हवनार्ह इव य इषवानन्नवान्कामवान्वा मननानि च नो रेजयति रक्षोहा च बलेन रेजयति । स्वयं सोऽस्मदभिनिन्दितारं वधैरजेत दुर्मतिम् । अवस्रवेदघशंसस्ततश्चावतरं क्षुद्रमिवावस्रवेत् । अभ्यासे भूयाँसमर्थं मन्यन्ते यथाहो दर्शनीयाहो दर्शनीयेति । तत्परुच्छेपस्यशीलं, परुच्छेप ऋषिः पर्ववच्छेपः, परुषि परुषि शेपोऽस्येति वा ॥ इतीमानि सप्तविंशतिर्देवतानामधे-

यान्यनुक्रान्तानि । सूक्तभाञ्जि हविर्भाञ्जि । तेषामेतान्यहविर्भाञ्जि-वेनोऽसुनीतिर्ऋत इन्दुः॥ प्रजापतिः प्रजानां पाता वा पालयिता वा । तस्यैषा भवति॥४२

वृद्धि शील, इन्दु के लिये मैं वह [स्तोत्र] कह सकूं, जो हवि के योग्य [देवता]की न्याई* अन्नवान् [वा कामना वाला=अन्न दाता वा कामनाओं को पूरने वाला] हुआ हमारे स्तोत्र को कंपाता है [हम उस की स्तुति में प्रवृत्त होते हैं] राक्षसों को मारता हुआ बल से कंपाता है। वह स्वयं हम से दुर्मति निन्दक को शस्त्रों द्वारा परे फैंके। पापाभलापी [हमारा अनिष्ट चाहने वाला) नीचे गिरे, [किसी] क्षुद्र [वस्तु] की न्याई अधिक से अधिक नीचे गिरता जाए [१।१।२९।६] कह सकूं मैं वह [स्तोत्र] वृद्धि शील इन्द्र के लिये जो हवन के योग्य । देवता की न्याई । इषवान्=अन्न वाला वा इच्छाओं वाला। हमारे स्तोत्रों को हिलाता है और राक्षसों को मारता हुआ अपने बल से उन को कंपाता है । स्वयं वह हम से निन्दक दुर्मति को शस्त्रों द्वारा परे फैंके । पाप चाहने वाला नीचे गिरे और क्षुद्र वस्तु की न्याई उन से भी नीचे नीचे गिरे। † अभ्यास में अधिक अर्थ मानते हैं। जैसे ' अहो दर्शनीय ! अहो

* इन्दु के लिये हवि का विधान किसी यज्ञ में नहीं, तथापि हविर्भागी देवताओं की न्याई वृष्टिद्वारा हमें अन्न देता है और हमारी कामनाओं को पूर्ण करता है। इस लिए हम कृतज्ञ हुए उसकी स्तुति में प्रवृत्त होते हैं । मानों वह अपने उपकारी को स्तुति के लिये प्रेरता है।

† मन्त्र में मन्म, मन्म, रेजति, रेजति अवब्रवेत, अवब्रवेत, इस प्रकार पदों का अभ्यास(पुनरुक्ति)देखकर उस पर विचार करते हैं।

दर्शनीय' यह ( अभ्यास ) है ‡। यह परुच्छेप का स्वभाव है [ अभ्यस्त शब्दों से स्तुति करता है ] परुच्छेप ऋषि है। पर्व वाले प्रजनन वाला, अथवा पर्व २ में जिस के प्रजनन शक्ति है। यह २७ देवता नाम [ वायु से इन्दुतक ] अनुक्रम से कहे हैं, जो सूक्त भागी भी हैं, और हविर्भागी भी हैं [ उनकी स्तुति में सूक्त पढ़े गए हैं, और इन को हवि दी जाती है ] पर उन में से यह हविर्भागी नहीं—वेन, असुनीति, ऋत और इन्दु [इन के लिये हविका विधान किसी यज्ञ में नहीं ] [ २८— ] प्रजापति प्रजाओं का पालक, उसकी यह है ॥४२॥

"प्रजापते ! न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्"॥ प्रजापते न हि त्वदेतान्यन्यः सर्वाणि जातानि तानि परि बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणामित्याशीः ॥ अहिर्व्याख्यातः । तस्यैषा भवति ॥४३॥

हे प्रजापते ! तेरे बिना कोई और इन सब उत्पत्ति वालों को घेरे हुए नहीं है, ( तू ही सब के रचने और पालने में समर्थ है ) जिस कामना वाले हुए हम तुझे बुलाते हैं, यह हो ( पूर्ण हो ) हम धनों के पति हों ( १०।१२१।१० ) ( मन्त्र का

‡ किसी सुवा को देखकर जैसे किसी स्त्री के मुख से दो बार निकले । जैसे यह उसके चित्तपर उसके गहरे प्रभाव का द्योतक होता है । इसी प्रकार अभ्यास सर्वत्र किसी अभिप्राय का द्योतक होता है ॥

पूर्वार्ध ) स्तुतिपरक है, ( उत्तरार्ध ) आशीः=प्रार्थना है। ( २९– ) अहिः, व्याख्या किया गया है ( २।१७ ) उस की यह है ॥ ४३ ॥

"अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजस्सु सीदत्" अप्सुजमुक्थैरहिं गृणीषे बुध्ने नदीनां रजस्सूदकेषु सीदन्। बुध्नमन्तरिक्षं बद्धा अस्मिन्धृता आप इतिवा। इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन्धृताः प्राणा इति। योऽहिःस बुध्न्यो बुध्नमन्तरिक्षं तन्निवासात्। तस्यैषा भवति ॥ ४४ ॥

"जलों में उत्पन्न हुए अहि की स्तुति करता हूं, जलों की जड़ में ( अन्तरिक्ष में ) जलों के अन्दर बैठता है ( ७।३४। १६ ) रजः सु = जलों में। बुध्नं = अन्तरिक्ष है, ( जलों की जड़ है ) अथवा जल इन में बंधे हुए धारे हुए होते हैं। यह जो दूसरा बुध्न ( शरीर ) है, वह भी इसी से है। प्राण इस में बंधे हुए = धारे हुए होते हैं। ( ३०– ) अहिर्बुध्न्यः = ( अहिश्चासौबुध्न्यः ) जो अहि वही बुध्न्य है, अन्तरिक्ष में निवास से। उस की यह है ॥ ४४ ॥

"मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः" ॥ मा च नोऽहिर्बुध्न्यो रेषणाय धान्मास्य यज्ञोऽस्य च स्रिधद्यज्ञकामस्य ॥ सुपर्णो व्याख्यातः। तस्यैषा भवति ॥ ४५ ॥

'अन्तरिक्ष में होने वाला अहि मत हमें किसी हानि पहुंचाने

वाले के लिये दे, यज्ञ की कामना वाले इस ( यजमान ) का यज्ञ मत क्षीण हो ( सदा प्रवृत्त रहे । ७।३४।७ ) (३१.-) सुपर्ण, व्याख्या किया गया है ( ३।१२१ में ) उस की यह है ॥४५॥

"एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं वि चष्टे । तं पाकेन मनसा पश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हिमातरम्" ॥ एकः सुपर्णः स समुद्रमाविशति स इमानि सर्वाणि भूतान्यभिविपश्यति तं पाकेन मनसा पश्यमन्तितः । इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता । तं माता रेढि वागेषा माध्यमिका स उ मातरं रेढि ॥ पुरूरवा बहुधा रोरूयते । तस्यैषा भवति ॥ ४६ ॥

अकेला सुपर्ण ( मध्यम देव = वायु ) वह समुद्र (अन्तरिक्ष) में आवेश करता है, वह इस सारे भुवन को ( अनुग्रह दृष्टि से ) देखता है। उस को पके हुए ( ज्ञानवान् ) मन से मैं अपने निकट देखता हूं, उस को माता ( माध्यमिका वाक् ) चाटती है और वह इस माता को चाटता है * ( १०।११४।४ ) जिस ने अर्थ (विशेष) देखा है, उस ऋषि की प्रसन्नता होती है, जब वह ( अर्थ ) आख्यान से युक्त ( कहा जाए, अर्थात् उसका मूल आख्यान कहा जाए ) । उस को माता चाटती है यह वाक् माध्यमिका । और वह माता को चाटता है । ( ३२- ) पुरूरवस् = बहु प्रकार से शब्द करता है, उस की यह है॥४६॥

---

* माध्यमिक वाणी वायु का आश्रय लेती है । वह उसका आश्रय लेता है ।

"समस्मिञ्जायमान आसत ग्ना उतेम वर्धन्नद्यः स्वगूर्ताः। महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः" ॥ समासतास्मिञ्जायमाने ग्ना गमनादापोदेवपत्न्यो वाऽपि चैनमवर्द्धयन्नद्यः स्वगूर्ताः स्वयंगामिन्यो महते च यत त्वा पुरूरवो रणाय रमणीयाय संग्रामायावर्धयन्दस्युहत्याय च देवाः ॥४७॥

"इस ( पुरूरवा ) के उत्पन्न होने पर स्त्रियें ( जल, उस को घेर कर ) स्थित हुए, स्वयं चलने वाले शोर करने वाले जलों ने इस को बढ़ाया। हे पुरूरवः ! जब देवताओं ने तुझे बड़े संग्राम के लिये, दस्यु (अकाल) के नाश के लिये बढ़ाया ( १०।९५।७ ) स्थित हुए इस के उत्पन्न होने पर। ग्नाः = जल, गमन से ( गति शील होते हैं ) अथवा ( ग्ना ) देवपत्नियें *। किञ्च इस को बढ़ाते हुए जल। स्वगूर्ताः=स्वयं चलने वाले। हे पुरू रवः ! जो तुझे बड़े, रणाय=रमणीय संग्राम के लिये बढ़ाते हुए दस्यु के मारने के लिये देवता ॥ ४७ ॥

## एकादशोऽध्यायः

श्येनो व्याख्यातः। तस्यैषा भवति ॥ १ ॥

( १.–) श्येन व्याख्या किया गया है ( ४।२४ में ) उस की यह है ॥१॥

आदाय श्येनो अभरत्सोमं सहस्रं सवां अयुतं

* देवपत्नी पक्ष में। नद्यः का अर्थ स्तुतिपरायणहुई, और स्वगूर्ताः का स्वयं चलने वाली=अपरतन्त्र।

च साकम् । अत्रा पुरन्धिरजहादरातीर्मदे सोमस्य मूरा अमुरः"॥ आदाय श्येनोऽहरत्सोमं सहस्रं सवानयुतं च सह सहस्रं सहस्रसाव्यमभिप्रेत्य तत्रायुतं सोमभक्षास्तत्सम्बन्धेनायुतं दक्षिणा इति वा। तत्र पुरन्धिरजहादमित्रानदानानिति वा । मदे सोमस्य मूरा अमूर इति । ऐन्द्रे च सूक्ते सोमपानेन स्तुतस्तस्मादिन्द्रं मन्यन्ते ॥ ओषधिः सोमः सुनोतेर्यदेनमभिषुण्वन्ति । बहुलमस्य नैघण्टुकं वृत्तमाश्चर्यमिव प्राधान्येन । तस्य पावमानीषु निदर्शनायोदाहरिष्यामः ॥ २ ॥

